# Sarvopanishatsarabhutam Shri Saumyakashisha Stotram

# સર્વોપનિષત્સારભૂતં શ્રીસૌમ્યકાશીશસ્તોત્રમ્

## Document Information

Text title : saumyakAshIshastotram sarvopaniShatsArabhUtaM by svAmItapovana

File name : saumyakAshIshastotram.itx

Category : shiva, stotra, upanishhat

Location : doc_shiva

Author : Swami Tapovanam

Proofread by : Rajesh Thyagarajan

Latest update : August 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 1, 2025

*sanskritdocuments.org*

# સર્વોપનિષત્સારભૂતં શ્રીસૌમ્યકાશીશસ્તોત્રમ્

સટિપ્પણં સ્વામીતપોવનં શ્રીસૌમ્યકાશીશસ્તોત્રં
તત્કૃતટિપ્પણીસમલઙ્કૃતં (See Footnotes)
ૐ
અર્પણમ્ ।
વિશ્વેશ્વરસ્ય કૃપયા ખલુ તત્પ્રયુક્તઃ
ક્ષુદ્રોપલબ્ધિમકુટોઽહમકાર્ષમેતત્ ।
તસ્યાર્પિતશ્ચપદયોઃ સ્તવકોપહારઃ
સ્તોત્રાત્મકસ્તુરભિલોઽસ્તુ સ સુપ્રસન્નઃ ॥ ૧॥

(સ્ત। ૧૮ શ્લો। ૨૫)।
શ્રીવિશ્વેશ્વર કી કૃપાસેં ઔર ઉસકીહી પ્રેરણાસે અત્યન્ત કૃશબુદ્ધિયુક્ત મૈંને યહ સ્તોત્રરૂપ સુગન્ધિ પુષ્પગુચ્છોંકા ઉપહાર બનાયા હૈ, ઔર ઉસી કેહીચરણોં મેં અર્પણ કિયા હૈ, વહ પરમાત્મા પ્રસન્ન હો ।
ૐ તત્સત્
કર્તા ।
૦૮। ૦૦ઓં તત્સત્

અથ શ્રીસૌમ્યકાશીશસ્તોત્રમ્ ।

## પ્રથમઃ સ્તબકઃ

વિશ્વનાથ નમસ્તુભ્યં વિશ્વમાયા વિલાસિને ।
કાશિકેશ નમસ્તુભ્યં કેશવાદ્યર્ચ્ચિતાઙ્ઘ્રયે ॥ ૧॥

વિશ્વમ્ભર નમસ્તુભ્યં વિશ્વવિધ્વંસમૂર્ત્તયે ।
વિશ્વરૂપ નમસ્તુભ્યં વિશ્વસૃડ્દર્પહારિણે ॥ ૨॥

વામદેવ મહાદેવ દેવદેવ જગત્પતે ।
ભવ ભક્ત્યા ભજામિ ત્વદ્ભવચ્છેદિ પદામ્બુજમ્ ॥ ૩॥

સૌમ્યકાશીપતે તુભ્યં સૌમ્યમૂર્ત્તે નમો નમઃ ।
સર્વદૈવ નમસ્તુભ્યં સર્વદૈવતરૂપિણે ॥ ૪॥

ગઙ્ગાધરોઽપિ(૧)ભગવાન ગઙ્ગારોધસિ વર્તસે ।
સોમસૂર્યાગ્નિનેત્રોઽપિ સોમચૂડશ્ચ દૃશ્યસે ॥ ૫॥

કાશીપૃષ્ઠે વિહરસિ વિરાણ્મૂર્ત્તિરપિ પ્રભો ।
કો વેત્તિ તવ માહાત્મ્યં ત્વદન્યઃ પરમાદ્ભુતમ્ ॥ ૬॥

Footnotes ૧ ગઙ્ગાં શિરસિ બિભ્રાણઃ

ગિરિરાજસુતાપુણ્યપરિપાકોઽસ્તુ મે ગતિઃ ।
સુરવૃક્ષવૃતે(૧)યસ્ય મન્દિરે સુન્દરે સ્થિતિઃ ॥ ૭॥

ત્રિશૂલરૂપયા શક્ત્યા હેરમ્બાદ્યૈશ્ચ નિર્જરૈઃ ।
ગોપકોટેશ્વરાભ્યાગ્ચ(૨)સંવૃતં શઙ્કરં ભજે ॥ ૮॥

વારિદાભઙ્ગલેગઙ્ગા વારિગૌરં કલેવરે ।
વારણાદ્રિપતિં(૩)વન્દે વારણાજિનવાસસમ્ ॥ ૯॥

કાલકાલં મહાકાલં કાલવ્યાલવિભૂષણમ્ ।
ફાલનેત્રં પ્રણૌમિ શ્રીકાશિકાપતિમીશ્વરમ્ ॥ ૧૦॥

ભૂતાનામીશ્વરં ભસ્મભૂષાભૂષિતવિગ્રહમ્ ।
શ્મશાનશાયિનં વન્દે જાટજૂટકમસ્તકમ્(૪) ॥ ૧૧॥

પુરત્રયનિષૂદાય પરમૈશ્વર્યધારિણે ।
પરાપરાય રુદ્રાય પરેશાય નમોનમઃ ॥ ૧૨॥

કરાલં કાલિકેશં નૃકરોટીકલિતસ્રજમ્ ।
આશાવાસોવસાનં શ્રીવિશ્વનાથમુપાસ્મહે ॥ ૧૩॥

કાલકૂટાશિને તુભ્યં શૈલકૂટનિવાસિને ।
શૂલિને પાલિને ધન્વશાલિનેઽસ્તુ નમો નમઃ ॥ ૧૪॥

તુષારધવલાઙ્ગોઽયં તુષારગિરિજાધવઃ ।
વૃષાધિવાહનો હન્યાદ્વૃષવન્દ્યોઽવૃષદ્વિષં (૫) ॥ ૧૫॥

Footnotes ૧ દેવદારુતરુભિરાવૃતે ૨ ગોપેશ્વરેણ કોટેશ્વરેણ ચ । ૩ વારણાવત નામ્નો ગિરેઃ પતિં, તત્ર નિવસન્તમિતિ યાવત્ ૪ જાટજૂટકો જટાબન્ધઃ ૫ પાપરૂપિણં વૈરિણમ્ ।

અર્દ્ધનારીપતે તુભ્યમધ્વરધ્વંસકારિણે ।

અઘોરાય નમસ્સાક્ષાદપારકરુણાબ્ધયે ॥ ૧૬ ॥

પ્રસીદ ભગવન્ શમ્ભો પ્રસીદ વૃષભધ્વજ ।
કુરુષ્વ કૃપયા નિત્યં નૃત્યમસ્મન્મનોઽઙ્ગણે ॥ ૧૭ ॥

ત્ર્યક્ષોઽપ્યસૌ સપ્તશિરાશ્ચ(૧)વિભ્રત્
સર્પસ્રજં ક્ષ્વેલભુગષ્ટમૂર્તિઃ ।
જેજીયતે હન્ત હિમાદ્રિ મધ્યે
કપાલભૃત્ કશ્ચન ભિક્ષુવર્યઃ ॥ ૧૮ ॥

કૈલાસશૈલે કલધૌતધૌતં
શૈલેન્દ્રકન્યામુપલાલયન્તમ્ ।
આરાધ્યમાનઞ્ચ સુરેન્દ્રમુખ્યૈ-
ર્વારાણસીનાથમહં પ્રપદ્યે ॥ ૧૯ ॥

કુવેરમિત્રં કુસુમેષ્વામિત્રં(૨)
કારુણ્યપાત્રં કરિરાજપુત્રમ્(૩) ।
સરોજનેત્રં સ્મિતપઞ્ચવક્ત્રં
સદા પવિત્રં શરણં પ્રપદ્યે ॥ ૨૦ ॥

અસ્તુ મે શરણં સૌમ્યકાશીનાથઃ સ્વયં પ્રભુઃ ।
યત્કૃપાલેશમાત્રેણ મર્ત્યોઽમર્ત્યપદં વ્રજેત્ ॥ ૨૧ ॥

Footnotes ૧ સપ્તયા જટયા સહ વર્તત ઇતિ સપ્તં તાદૃશં શિરો યસ્યાસ્તિ સઃ ૨ કુસુમેષોર્મન્મથસ્ય અમિત્રં શત્રું ૩ કરિરાજો ગણેશસ્સપુત્રો યસ્ય તમ્ ॥

વિભો વિશ્વેશ વિશ્વાત્મન્ વિભાકર નિભદ્યુતે ।
વિભાતુમોહરજનીદ્વિભાવો(૧)મેઽપસર્પતુ ॥ ૨૨ ॥

વ્યોમાદિ ભૂતાનિ ભવત્સ્વરૂપં
દેવાદિ દેહાશ્ચ ભવત્સ્વરૂપમ્ ।
જીવાશ્ચ સર્વેઽપિ ભવત્સ્વરૂપં
સર્વાત્મનસ્તેઽસ્તુ નમઃ પદાભ્યામ્ ॥ ૨૩ ॥

ત્વમેવ વિષ્ણુઃ કમલા ચ દુર્ગે-
ત્યુપાસ્યસે કલ્પિતમૂર્તિભેદૈઃ ।
કાશીશ સર્વેશ્વર શર્વસર્વ-
દેવાત્મનસ્તેઽસ્તુ નમઃ પદાભ્યામ્ ॥ ૨૪ ॥

શુદ્ધં શિવં બુદ્ધમબુદ્ધિગમ્યં
બ્રહ્મેતિ યદ્વસ્તુ વદન્તિ વેદાઃ ।
તત્ત્વં(૨)વિભો વિશ્વપતે ન તત્વં
કિઞ્ચિત્પરં તેઽસ્તુ નમઃ પદાભ્યામ્ ॥ ૨૫॥

Footnotes ૧ દ્વૈત ભ્રમઃ ૨ તત્ ત્વમિતિ છેદઃ

## દ્વિતીયઃ સ્તબકઃ

અસ્મિન્ સ્તબકે ઈશકેનોપનિષદોર્વિષયાસ્સઙ્ગ્રહેણ સઙ્ગ્રથિતાઃ તથા ચ તૃતીયે ચતુર્થે ચ કાઠકસ્ય, પઞ્ચમે પ્રશ્નસ્ય, ષષ્ઠે મુણ્ડકસ્ય, સપ્તમે માણ્ડૂક્ય તૈત્તિરીયયોઃ, અષ્ટમે ઐતરેયસ્ય ચ વિષયાસ્સઙ્ક્ષેપતસ્સમુદ્ધૃતાઃ ॥

ન વાસ્યમિદં સર્વં સર્વસન્યસનેન યઃ ।
લભ્યતેઽલુબ્ધશીલેન(૧)તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧॥

કામ્યનિષ્કામકર્મભ્યાં યો દેવઃ સમ્પ્રપૂજ્યતે ।
કર્મિભિઃ કર્મમર્મજ્ઞૈસ્તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૨॥

યદજ્ઞાનહતામૂઢા ભ્રામ્યન્તે બહુયોનિષુ ।
(૨)આત્મહત્યાપરિગ્રસ્તાસ્તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૩॥

મનોઽતિવેગવત્તસ્માજ્જવીયસ્તરમિષ્યતે ।
યદેકં સત્યમત્યક્ષં(૩)તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૪॥

યસ્મિન્ સતિ જગત્સર્વં સૂત્રદેવેન ધાર્યતે ।
નિત્ય ચૈતન્યરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૫॥

ચલં નિશ્ચલં ચૈવ નિકટસ્થં ચ દૂરગમ્ ।
અન્તર્વહિશ્ચ સમ્પૂર્ણં તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૬॥

સ્વાત્માયઃ સર્વભૂતાનામાશ્રયત્વેન વીક્ષ્યતે ।
વિદ્વદ્ભિર્વીતધીદોષૈસ્તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૭॥

Footnotes ૧ પુરુષેણેતિ શેષઃ ૨ આત્મહત્યા શુદ્ધાત્મનિ અશુદ્ધત્વાધ્યાસઃ ૩ અતીન્દ્રિયં ૪ યદાત્મતત્વમિતિ શેષઃ ૫ ઉક્તાત્મસ્વરૂપાય ।

યન્મયં સતિ યદ્બોધે વિશ્વં પશ્યન્તિ સૂરયઃ ।
નિશ્શુચશ્ચ વિરાજન્તે તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૮॥

શુદ્ધં સર્વત્ર સંવ્યાપ્તં કાયસમ્બન્ધવર્જિતમ્ ।

દૃશિમાત્ર સ્વરૂપં યત્તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૯॥

ધર્માધર્માઘસંસ્પૃષ્ટઃ પ્રજેશાનાઞ્ચ(૧)યઃ પ્રભુઃ ।
સ્વયમ્ભૂઃ પરિભૂશ્ચૈવ તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૦॥

ઉપાસ્ત્યા કર્મણાવાપિ યત્તત્વં નોપલભ્યતે ।
જ્ઞાનગમ્યાય નિત્યાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૧॥

ધ્યાયિભિર્ધ્યાયમાનં યત્ પ્રાપ્યમાણઞ્ચ યત્પદમ્ ।
કાર્યબ્રહ્મસ્વરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૨॥

ચક્ષુઃશ્રોત્રાદીન્દ્રિયાણિ તત્તત્કાર્યકરાણિ વૈ ।
યદ્દેવાનુગૃહીતાનિ તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૩॥

શ્રોત્રાદેરપિ યં દેવં શ્રોત્રાદિમનુદૃશ્ય હિ ।
મહાન્તો યન્તિ નિર્વાણં તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૪॥

યત્ર વ્રજન્તિ નો ચક્ષુર્વાઙ્મનાંસિ મનાગપિ ।
ન જ્ઞાતં યશ્ચનાજ્ઞાતં તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૫॥

વ્યજ્યતે યન્નવાચા યદ્વાચં વ્યઞ્જયતિ સ્ફુટમ્ ।
સચ્ચિદ્બ્રહ્મસ્વરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૬॥

મનુતે ન મનોયત્તુ મનુતે યેન માનસમ્ ।
સચ્ચિદ્બ્રહ્મસ્વરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૭॥

Footnotes ૧ પ્રજાપતીનામ્ ।

શ્રોત્રેણ શ્રૂયતે યન્ન શ્રોત્રં યેન શ઼ૃણોતિ વૈ ।
સચ્ચિદ્બ્રહ્મસ્વરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૮॥

ચક્ષુષા દૃશ્યતે યન્ન યેન ચક્ષુઃ પ્રપશ્યતિ ।
સચિદ્બ્રહ્મસ્વરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૧૯॥

પ્રાણેન ચેષ્ટતે યન્ન યેન પ્રાણઃ પ્રચેષ્ટતે ।
સચ્ચિદ્બ્રહ્મસ્વરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૨૦॥

દ્રષ્ટ્રા ન દૃશ્યતે યદ્વૈ દૃશ્યતે ચાપ્રપશ્યતા ।
શુદ્ધચિન્માત્રરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૨૧॥

યસ્સર્વવુદ્ધિવૃત્તીનાં સાક્ષિત્વેન પ્રકાશતે ।
શુદ્ધચિન્માત્રરૂપાય તસ્મૈ શ્રીશમ્ભવે નમઃ ॥ ૨૨॥

નિયમ્યદૈત્યાન્ નિજસેતુભેતૄન્(૧)
સુરપ્રિયો યો હિ જગત્પ્રશાસ્તિ ।
બુદ્ધાયમાપુશ્ચ મહેન્દ્રમુખ્યા
મહત્પદં તં ભજ વિશ્વનાથમ્ ॥ ૨૩॥

(૨)વિદ્યુત્પ્રકાશાયિત ચિત્પ્રકાશ-
શ્ચક્ષુર્નિમેષાયિત લોકસર્ગઃ ।
ઇન્દ્રાદિગર્વાપહરશ્ચ વિશ્વ-
મૂર્ત્તિશ્ચ યસ્તં ભજ વિશ્વનાથમ્ ॥ ૨૪॥
Footnotes ૧ સ્વકલ્પિતધર્મભેદકાન્। ૨ વિદ્યુત્ પ્રકાશવત્ યુગપદ્વિશ્વવ્યાપકં ચિજ્જ્યોતિરિતિ ભાવઃ

તપશ્ચ શાન્તિસ્સકલાશ્ચ વિદ્યા-
સ્સત્યઞ્ચ યસ્ય પ્રતિપત્તિહેતુઃ ।
સત્યં સકૃદ્ભાસુરમાત્મવિદ્યા(૧)
મૂર્ત્તિર્યતસ્તં ભજ વિશ્વનાથમ્ ॥ ૨૫॥
Footnotes ૧ સર્વદા ।

## તૃતીયઃ સ્તબકઃ

પ્રતિષ્ઠા(૧)જગતઃ સાક્ષાદગ્નિરૂપેણ યઃ પ્રભુઃ ।
યતશ્ચ કર્મણાં સિદ્ધિર્વિશ્વનાથસ્સ મે ગતિઃ ॥ ૧॥

અસ્તિ નાસ્તીતિ યદ્દેવે વિચિકિત્સન્ત્યપણ્ડિતાઃ
નિત્યસિદ્ધસ્તુ વિદુષાં વિશ્વનાથસ્સ મે ગતિઃ ॥ ૨॥

દેવૈરપિ મહાપ્રજ્ઞૈર્યસ્મિન્ સંશયિતં પુરા ।
દુર્વિજ્ઞેયસ્તુ સૂક્ષ્મત્વાદ્વિશ્વનાથસ્સ મે ગતિઃ ॥ ૩॥

પુત્રપૌત્રસમૂહેન પ્રાજ્યરાજ્યશ્રિયાપિ વા ।
પ્રાપ્તું ન શક્યતે યઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૪॥

યોગક્ષેમ નિષક્તાનાં પ્રેયઃ પથવિચારિણામ્ ।
ક્રોશકોટિવિદૂરઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૫॥

ત્યક્ત્વા કામાન્ સુષ્ઠુ ધીરૈઃ શ્રેયઃ પ્રાર્થિતયા હૃદિ ।
પૂજ્યતે ભાવ્યતે યઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૬॥

શ્રૃણ્વન્તિ બહવો યન્ન શ્રુત્વાપિ ન વિદન્તિ ચ ।
વક્તાપિ દુર્લભો યસ્ય વિશ્વનાથસ્સ મે ગતિઃ ॥ ૭ ॥

તર્કાગમ્યા હિ યદ્બુદ્ધિર્દેશિકોક્ત્યૈવ ગમ્યતે ।
બહુધા ચિન્ત્યમાનઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૮ ॥
Footnotes ૧ બિરાડ્રૂપેણ જગત્ પ્રતિષ્ઠાત્વમગ્રેઃ

આબ્રહ્મભુવનાદ્યો હિ વિરક્તસ્સાધનાન્વિતઃ ।
તેનૈવ દૃશ્યતે યઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૯ ॥

અધ્યાત્મયોગયુક્તેન ચેતસા યોઽનુચિન્ત્યતે ।
ગુહાહિતનિગૂઢઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૦ ॥

શ્રુત્યા મત્યા ચ યં લબ્ધ્વા મોદતે(૧)મોદવારિધૌ ।
મોદનીયશરીરઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૧ ॥

પુણ્યપાપાત્પૃથગ્ભૂતઃ કાર્યકારણતશ્ચ યઃ ।
કાલત્રયાચ્ચ શશ્વચ્છ્રી વિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૨ ॥

યત્પદં ગીયતે વેદૈઃ યત્પદં બ્રહ્મચર્યયા ।
દિદૃક્ષન્તે મહાન્તઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૩ ॥

પ્રણવૈકપ્રકાશ્યો યસ્તત્પ્રતીકશ્ચ યઃ પ્રભુઃ ।
પરાપરબ્રહ્મરૂપો વિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૪ ॥

શરીરે હન્યમાનેઽપિ ન ચ હન્યેત યોઽજનિઃ ।
શાશ્વતશ્શશ્વદાભઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૫ ॥

કર્તૃતા કર્મતા ચૈવ યસ્મિન્નધ્યસ્યતે ખલૈઃ ।
વસ્તુતોઽદ્વૈત મૂર્તિઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૬ ॥

અણુભ્યોઽણુતરો યશ્ચ મહદ્ભ્યોઽપિ મહત્તરઃ ।
શોકરાશિવિમુક્તઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૭ ॥

આસ્તેયાતીવ યઃ શેતે વિષીદતિ ચ હૃષ્યતિ ।
વિરુદ્ધધર્મા વિશ્વાત્મા વિશ્વનાથસ્સ મે ગતિઃ ॥ ૧૮ ॥
Footnotes ૧ વિદ્વાનિતિ શેષઃ

નિર્વપૂર્વપુરધ્યક્ષો નિત્યનિર્વૃતવિગ્રહઃ ।

વ્યોમવદ્વ્યાપકો યઃ શ્રીવિશ્વનાથસ્સમે ગતિઃ ॥ ૧૯॥

વેદવેદાઙ્ગ પાઠેન પ્રજ્ઞયા પ્રાભવેણ વા ।
યોઽયમાત્મા ન લભ્યઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૨૦॥

પ્રેમ્ણા સમ્પ્રાર્થ્ય સમ્પ્રાર્થ્ય યેન સન્ધીયતે(૧)ભૃશમ્ ।
તેનૈવ લભ્યતે યઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૨૧॥

અશનં યસ્ય દેવસ્ય બ્રહ્મક્ષત્રાદિકં જગત્ ।
ઉપદંશસ્તુ મૃત્યુઃ શ્રીવિશ્વનાથસ્સ મે ગતિઃ ॥ ૨૨॥

દેહે રથે બુદ્ધિ નિયન્તૃકે યો
રથિત્વમાસાદ્ય ચરત્યજત્રમ્ ।
ભોક્તાઽપિ સોઽદભ્રવિચિત્રલીલ-
સ્ત્વમેવ વિશ્વેશ નિરઞ્જનોઽપિ ॥ ૨૩॥

ક્ષતુસ્સદશ્વા ઇવ યસ્ય વશ્યા-
ન્યક્ષાણિ તત્પ્રાપ્યમરૂપરૂપમ્ ।
વન્દે તમવ્યક્તપરં પુરાણ-
મધ્વાવધિં(૨)વિષ્ણુમુમેશમારાત્ ॥ ૨૪॥

ક્ષુરસ્યધારાવદતીવ દુર્ગં
યન્માર્ગમાહુઃ કવયો વિનિદ્રાઃ ।
અશબ્દમસ્પર્શમનધ્રુવં તં
ભક્ત્યા ભજે ભવ્યનિધિં મૃડેશમ્ ॥ ૨૫॥
Footnotes ૧ અનુધ્યાયતે। ૨ અધ્વનઃ સંસારગતેરવધિમ્ ।

## ચતુર્થઃ સ્તબકઃ

પરાગર્થસમર્થાનિ(૧)સસર્જાક્ષાણિ યઃ પ્રભુઃ ।
અન્તર્નદૃશ્યતે તસ્માદ્વિશ્વેશં તમુપાશ્રયે ॥ ૧॥

અધ્રુવં કામજાલં હિ વિહાય વિગતાશિષઃ ।
ધ્રુવેચ્છયા(૨)ભજન્તે યં વિશ્વેશં તમુપાશ્રયે ॥ ૨॥

રૂપાદિ વિષયાન્ સર્વાન્ યેન ચિદ્ધાતુના જનાઃ ।
વિજાનન્તિ દૃગાત્મશ્રી વિશ્વેશં તમુપાશ્રયે ॥ ૩॥

સ્વાપ્નિકં જાગ્રતં ચૈવ વસ્તુજાતમ્પ્રકાશયન્ ।
જાગર્તિ સર્વદા યઃ શ્રીવિશ્વેશં તમુપાશ્રયે ॥ ૪॥

પ્રાણાદિધારકં જીવં પ્રણિધાય યદાત્મના ।
અભયં યાન્તિ સન્તઃ શ્રીવિશ્વેશં તમુપાશ્રયે ॥ ૫॥

સૂત્રાત્મા સૂત્રધારોઽસૌ જગત્ સર્ગાદિનાટકે ।
યસ્માત્ સમ્પદ્યતે સાક્ષાદ્વિશ્વેશં તમુપાશ્રયે ॥ ૬॥

અરણ્યોર્નિહિતો યસ્તુ યાજ્ઞિકૈસ્સમુપાસ્યતે ।
આશ્રયાશશરીરઃ(૩)શ્રીવિશ્વેશં તમુપાશ્રયે ॥ ૭॥

યસ્માદુદેતિ સવિતા યસ્મિન્નેવ દિને દિને ।
અસ્તમેતિ જગત્પ્રાણં વિશ્વેશં તમુપાશ્રયે ॥ ૮॥

Footnotes ૧ શબ્દાદિ યાહ્યવિષયપ્રકાશકાનિ ૨ મોક્ષેચ્છયા ૩ આશ્રયાશઃ અગ્નિઃ

બ્રહ્મયદ્ભાસતેઽધર્મિ દેહધર્મેણ દુર્ધિયામ્ ।
નાસ્તિ નાનાઽદ્વિતીયં શ્રી વિશ્વેશં તમુપાશ્રયે(૧) ॥ ૯॥

યસ્મિન્નાનાત્વમાપાદ્ય માયાવિભ્રાન્તદૃષ્ટયઃ ।
મૃત્યુચક્રે ભ્રમન્તિ શ્રીવિશ્વેશં તમુપાશ્રયે ॥ ૧૦॥

યોઽઙ્ગુષ્ઠપરિમાણસ્સન્ મર્ત્યાનાં હૃદયામ્બુજે ।
નિર્દ્ધૂમવહ્નિવદ્ભાતિ વિશ્વેશં તમુપાશ્રયે ॥ ૧૧॥

પ્રસન્નામ્ભો યથાતાદૃક્ પ્રક્ષિપ્તં શુદ્ધવારિણિ ।
તદ્વદ્યદ્વિદ આત્માસ્યાદ્વિશ્વેશં તમુપાશ્રયે ॥ ૧૨॥

એકાદશદ્વારયુતે પુરે યઃ પ્રતિતિષ્ઠતિ ।
રાજવત્સૂર્યસઙ્કાશં વિશ્વેશં તમુપાશ્રયે ॥ ૧૩॥

પ્રાણાપાનૌ નયત્યૂર્દ્ધ્વમધઞ્ચાન્તરવસ્થિતઃ ।
દેવાશ્ચોપાસતે(૨)યં શ્રીવિશ્વેશં તમુપાશ્રયે ॥ ૧૪॥

યસ્ય વિસ્ત્રંસને દેહો નિશ્ચેષ્ટઃ કાષ્ઠખણ્ડવત્ ।
પ્રાણસ્વામિનમારાચ્છ્રી વિશ્વેશં તમુપાશ્રયે ॥ ૧૫॥

પ્રાણાપાનૌ યમાશ્રિત્ય વિધત્તઃ સ્વસ્વજીવનમ્ ।
વિજ્ઞાનઘનમજ્ઞેયં વિશ્વેશં તમુપાશ્રયે ॥ ૧૬॥

નિર્મિમાણો બહૂન્ કામાન્ કરણોપરમેઽપિ યઃ ।

જાગર્તિ શશ્વદ્રૂપં વિશ્વેશં તમુપાશ્રયે ॥ ૧૭॥

યથાગ્નિર્દાહ્યભેદેન બહુર્ભવતિ યસ્તથા ।
દેહેષુ દેહિતામેતિ વિશ્વેશં તમુપાશ્રયે ॥ ૧૮॥
Footnotes ૧ તદ્બ્રહ્મરૂપિણં ૨ ચક્ષુરાદયઃ

રૂપંરૂપમનુપ્રાપ્ય તત્તત્સારૂપ્યમૃચ્છતિ ।
યઃ પરાત્મા યથા વાયુર્વિશ્વેશં તમુપાશ્રયે ॥ ૧૯॥

અક્ષિદોષૈર્યથા સૂર્યો લોકદુઃખૈસ્તથૈવ યઃ ।
લિપ્યતે નહિ ભૂતાત્મા વિશ્વેશં તમુપાશ્રયે ॥ ૨૦॥

નિત્યાનામપિ યો નિત્યશ્ચેતનાનાઞ્ચ ચેતનઃ ।
સર્વશં સર્વબુદ્ધિસ્થં વિશ્વેશં તમુપાશ્રયે ॥ ૨૧॥

ઊર્દ્ધ્વમૂલમધઃ શાખં છિનત્ત્યશ્વત્થમૃદ્ધધીઃ ।
યત્કટાક્ષકુઠારેણ વિશ્વેશં તમુપાશ્રયે ॥ ૨૨॥

નિરીક્ષ્ય વજ્રોદ્યતપાણિમીશ્વરં
યથા (૧)ભુજિષ્યાશ્શિખિ(૨)ભાસ્વદાદયઃ ।
વિભક્ત કૃત્યેષુ તથૈવ યદ્ભયાત્
ચરન્ત્યજસ્રં કુરુ તદ્ધરે રતિમ્ ॥ ૨૩॥

બુદ્ધીન્દ્રિયાણાં મનસશ્ચબુદ્ધે-
રચેષ્ટનં શ્રેષ્ઠગતિર્હિ યોગઃ ।
નિદ્ધ્યાયતે(૩)તેન ય ઇશિભાક્તં
તસ્મિન્નરૂપે કુરુ સત્સ્વરૂપે ॥ ૨૪॥

ઉપાસકૈર્યઃ ક્રમશોઽધિગમ્ય-
સ્સુષુમ્નયા મઙ્ક્ષુ ચ વર્ષ્મણો(૪)યઃ ।
મુઞ્જાદિષીકેવ વિવિક્તધીભિ-
ર્નિષ્કૃષ્યતે તં ભજકાશિકેશમ્ ॥ ૨૫॥
Footnotes ૧ કિઙ્કરાઃ ૨ અગ્નિસૂર્યાદયઃ ૩ દૃશ્યતે ૪ શરીરાત્ ।

## પઞ્ચમઃ સ્તબકઃ

શ્રદ્ધયા બ્રાહ્મચર્યેણ ગુરુશુશ્રૂષણેન ચ ।

બ્રહ્મયબ્દુધ્યતે ધીરૈસ્તમીડે મૃડમીશ્વરમ્ ॥ ૧॥

પ્રજાપતિશરીરસ્સન્ પ્રજાઃ કામયતે પ્રભુઃ ।
તપશ્ચ તપ્યતે દિવ્યં તમીડે મૃડમીશ્વરમ્ ॥ ૨॥

અગ્નીષોમૌ(૧)સૃજત્યાદૌ યઃ પ્રજાકરણેચ્છયા ।
અઞ્જન્નભૂતૌ ભૂતેશં તમીડે મૃડમીશ્વરમ્ ॥ ૩॥

સૂર્યાત્સના સર્વ લોકચક્ષુસ્તપતિ રશ્મિવાન્ ।
પ્રાણાશ્રયશ્ચ યો દેવસ્તમીડે મૃડમીશ્વરમ્ ॥ ૪॥

સંવત્સરં ષટ્ચરણં(૨)દ્વાદશાકૃતિ(૩)સંયુતમ્ ।
કાલમૂર્ત્તિ વિધત્તે યસ્તમીડે મૃડમીશ્વરમ્ ॥ ૫॥

માસો દિનં તતશ્ચાન્નમન્નાદ્રીર્યં તતઃ પ્રજાઃ ।
યત ઇત્થં પ્રજોત્પત્તિસ્તમીડે મૃડમીશ્વરમ્ ॥ ૬॥

પ્રાણાત્મના યેન સમ્યગ્વાણમેતદ્ધિધાર્યતે(૪) ।
પઞ્ચવૃત્તિ વિભક્તન તમીડે મૃડમીશ્વરમ્ ॥ ૭॥

વરિષ્ટપ્રાણદેવં યં પ્રાણાસ્સર્વેઽનુયાન્તિ વૈ ।
સ્વરાજં મક્ષિકાયદ્વત્તમીડે મૃડમીશ્વરમ્ ॥ ૮॥
Footnotes ૧ સૂર્યાચન્દ્રમસૌ ૨ ચરણાનિઋતવઃ ૩ આકૃતયો માસાઃ ૪ શરીરમ્ ।

અગ્નિરર્કશ્ચ પર્જન્યો મઘવાનનિલોઽપિ યઃ ।
પ્રાણાત્મના જગત્સર્વે તમીડે મૃડમીશ્વરમ્ ॥ ૯॥

યસ્માદુત્પદ્યતે પ્રાણશ્છાયાવદનૃતાકૃતિઃ ।
પરસ્માદક્ષરાત્ર્યક્ષં તમીડે મૃડમીશ્વરમ્ ॥ ૧૦॥

નિયુઙ્ક્તે પ્રાણરૂપસ્સન્નપાનાદીન્ પૃથક્ પૃથક્ ।
સંરાઽધિકૃતાન્ યદ્વત્તમીડે મૃડમીશ્વરમ્ ॥ ૧૧॥

એકોત્તરશતં નાઙ્યસ્સશાખા નિસ્સૃતાહૃદઃ ।
વ્યાનાખ્યોઽતિયસ્તત્ર તમીડે મૃડમીશ્વરમ્ ॥ ૧૨॥

ઇન્દ્રિયોપરમે ભાનુ(૧)રશ્મિવદ્ધૃદિ દૃશ્યતે ।
યેન સ્વપ્નજમાહાત્મ્યં તમીડે મૃડમીશ્વરમ્ ॥ ૧૩॥

યદાનિરુધ્યતે ચિત્તં તૈજસા(૨)સુપ્તિમાસ્થિતઃ ।
યોઽશ્નુતે સુખમક્ષય્યં તમીડે મૃડમીશ્વરમ્ ॥ ૧૪॥

વિજ્ઞાનાત્મા સહપ્રાણૈર્દેવભૂતૈશ્ચ(૩)સંવિશેત્ ।
શાન્તે સ્વાત્મનિ યત્તુર્યે તમીડે મૃડમીશ્વરમ્ ॥ ૧૫॥

ઓઙ્કારાયતનેનૈતત્ પરઞ્ચાપરમેવ ચ ।
બ્રહ્મયદ્ભાવ્યતે ભવ્યૈસ્તમીડે મૃડમીશ્વરમ્ ॥ ૧૬॥

ઓઙ્કારેણ ત્રિમાત્રેણ ધ્યાયી નિષ્પાપ એષ્યતિ ।
બ્રહ્મલોકેન યદ્બ્રહ્મ તમીડે મૃડમીશ્વરમ્ ॥ ૧૭॥
Footnotes ૧ યથાસ્તમયે ભાનૌરશ્મય એકી ભવન્તિ તદ્વદિત્યર્થઃ ૨ નાડીશયેન પિત્તેન ૩ દેવા અગ્ન્યાદયઃ ભૂતાનિઃ પૃથિવ્યાદીનિ ।

હૃચ્છયો નિષ્કલઃ સ્વાત્મા કલાવાનિવ લક્ષ્યતે ।
અવિદ્યાઽવદ્યબુદ્ધેર્યસ્તમીડે મૃડમીશ્વરમ્ ॥ ૧૮॥

પ્રભવન્તિ કલા યસ્માદ્યસ્મિન્નેવાપિ યન્તિ ચ ।
નિર્વિશેષે પરે તત્વે તમીડે મૃડમીશ્વરમ્ ॥ ૧૯॥

યશ્ચિતિ વ્યતિરેકેણ કલાઃ કાલત્રયેઽપિ ચ ।
ન તિષ્ઠન્તિ તતો મિથ્યા તમીડે મૃડમીશ્વરમ્ ॥ ૨૦॥

વિજ્ઞાનં ક્ષણિકં પ્રાહુશ્શૂન્યમિત્યપરે જનાઃ ।
કલાધારં યમાત્માનં તમીડે મૃડમીશ્વરમ્ ॥ ૨૧॥

અનિત્યો ગુણ ઇત્યાહુર્ભૂત ધર્મસ્તથાપરે ।
ચૈતન્યં યત્કલાધારં તમીડે મૃડમીશ્વરમ્ ॥ ૨૨॥

પ્રાણં તથાસ્તિક્યમર્તિ ખવાયૂ
જ્યોતિર્જલં ભૂમિમથેન્દ્રિયઞ્ચ ।
મનઞ્ચ તેનેઽતનુદૃગ્યઈશ-
સ્સ વિશ્વનાથો ભિયમુચ્છિનત્તુ ॥ ૨૩॥

અન્નં બલઞ્ચૈવ તપશ્ચ મન્ત્રાઃ
કર્માથ લોકાશ્ચ તતોઽભિધાનમ્ ।
ઇત્થં કલાષ્ષોડશ યસ્સસર્જ
સ વિશ્વનાથો ભિયમુચ્છિનત્તુ ॥ ૨૪॥

સ્વકારણે યત્ર કલાસ્સમગ્રા
રૂપઞ્ચ નામાત્મવિદાં વિહાય ।

એકીભવન્ત્યમ્બુનિધૌ યથાપ-
સ્સ વિશ્વનાથો ભિયમુચ્છિનત્તુ ॥ ૨૫॥

## ષષ્ઠઃ સ્તબકઃ

યત્સ્વરૂપં ન નિર્ણેતું દેશિકોપનતિં વિના ।
શક્યતે પણ્ડિતેનાપિ શં કરોતુ સ શઙ્કરઃ ॥ ૧॥

જ્ઞાતે યસ્મિન્જગત્સર્વં જ્ઞાતં ભવતિ ભાવુકઃ(૧) ।
સર્પરજ્જુવદાધારશ્શં કરોતુ સ શઙ્કરઃ ॥ ૨॥

પરવિદ્યૈવં યત્ પ્રાપ્તૌ સાધનં કર્મકોટયઃ ।
કુણ્ઠી ભવન્તિ યસ્યાગ્રે શં કરોતુ સ શઙ્કરઃ ॥ ૩॥

દૃશ્ય ગ્રાહ્યેતરો(૨)ગોત્રવર્ણહીનશ્ચ યો વિભુઃ ।
ચક્ષુઃ શ્રોત્રવિનિર્મુક્તશ્શં કરોતુ સ શઙ્કરઃ ॥ ૪॥

ઊર્ણનાભિર્યથા તન્તૂન્ સૃજતે સંહરત્યપિ ।
એવં યસ્સૃજતે લોકાન્ શં કરોતુ સ શઙ્કરઃ ॥ ૫॥

તપસા(૩)ચીયમાનાદ્ધૈ યસ્માત્સૂત્રાદિકં જગત્ ।
પ્રાદુર્ભવતિ વિશ્વેશશ્શં કરોતુ સ શઙ્કરઃ ॥ ૬॥

કર્મણા વધ્યતે જન્તુસ્ત્યાગેન તુ વિમુચ્યતે ।
વિમોક્ષરૂપો યસ્સાક્ષાચ્છં કરોતુ સ શઙ્કરઃ ॥ ૭॥

ધર્માધર્મૌ સમુત્સૃજ્ય યત્કૃપાનૌકયા બુધઃ ।
ઉત્તિતીર્ષેદ્ભવામ્ભોધિં શં કરોતુ સ શઙ્કરઃ ॥ ૮॥

Footnotes ૧ મઙ્ગલતનુઃ ૨ અદૃશ્યઃ અઙ્ગ્રાહ્યશ્ચ ૩ આલોચનાત્મકેન ।

અવિદ્યા તમસિ ભ્રાન્તા મૂઢાઃ પણ્ડિતમાનિનઃ ।
પીડ્યન્તે યત્પદભ્રષ્ટાઃ શં કરોતુ સ શઙ્કરઃ ॥ ૯॥

ઇષ્ટાપૂર્ત્તં શ્રેષ્ઠમાહુર્યે જનાઃ કામકામિનઃ ।
ભ્રમન્તિ તે પદભ્રપ્રાષ્ટાશ્શં કરોતુ સ શઙ્કરઃ ॥ ૧૦॥

તપસ્યન્તો વનાન્તેષુ ભિક્ષવશ્ચાદિજોન્તિકં (૧) ।
વ્રજન્તિ યત્પદભ્રષ્ટાશ્શં કરોતુ સ શઙ્કરઃ ॥ ૧૧॥

કર્મનિષ્પાદિતે લોકે નિર્વિણ્ણે યદ્વિવિત્સયા ।

ઉપેયાદ્ ગુરુપાદાબ્જં શં કરોતુ સ શઙ્કરઃ ॥ ૧૨॥

ઉપસન્નાય યત્તત્વં શમાદિગુણશાલિને ।
બ્રૂયતે દેશિકન્દ્રેણ શં કરોતુ સ શઙ્કરઃ ॥ ૧૩॥

અગ્નિસ્ફુલિઙ્ગવદ્ભાવા નિસ્સરન્તિ યતોઽક્ષરાત્ ।
સર્વેઽપિ યત્ર લીયન્તે શં કરોતુ સ શઙ્કરઃ ॥ ૧૪॥

અન્તર્બહિશ્ચ સમ્પૂર્ણો મનઃ પ્રાણાદિવર્જિતઃ ।
અમૂર્તો દિવ્યમૂર્ત્તિર્યશ્શં કરોતુ સ શઙ્કરઃ ॥ ૧૫॥

દ્યુલોકો મસ્તકં યસ્ય ચક્ષુષીન્દુ દિવાકરૌ ।
દિશઃ શ્રોત્રે પદં પૃથ્વી શં કરોતુ સ શઙ્કરઃ ॥ ૧૬॥

યસ્માદ્ભવન્તિ ભૂતાનિ વનપર્વતસાગરાઃ ।
યસ્માત્ સ્રવન્તિ ગઙ્ગાદ્યાઃ શં કરોતુ સ શઙ્કરઃ ॥ ૧૭॥

વર્ણો(૨)ધનુશ્શરોહ્યાત્મા શરવ્યં બ્રહ્મયત્પરમ્ ।
દ્વૈતાદ્વૈતવિનિર્મુક્તઃ શઙ્કરોતુ સશઙ્કરઃ ॥ ૧૮॥
Footnotes ૧ આદિજા હિરણ્યગર્ભઃ ૨ ઓઙ્કારઃ

શબ્દજાલં સમુત્સૃજ્ય રમન્તે યત્પરાત્મનિ ।
નિસ્પૃહા નિખિલાધારે શં કરોતુ સ શઙ્કરઃ ॥ ૧૯॥

પિણ્ડિકાયામરા યદ્બ્રહ્મન્યો યત્ર સંહતાઃ ।
તત્રાસ્તે બહુધા નૃત્યન્ શં કરોતુ સ શઙ્કરઃ ॥ ૨૦॥

યસ્મિન્ દૃષ્ટે નષ્ટકર્મા છિન્નગ્રન્થિર સંશયઃ ।
મૃત્યુમુક્તો ભવેન્મર્ત્યઃ શં કરોતુ સ શઙ્કરઃ ॥ ૨૧॥

સૂર્ય સોમૌ તથા વિદ્યુદ્યં ન ભાસયિતું ક્ષમાઃ ।
યદ્ભાસૈતે પ્રકાશન્તે શં કરોતુ સ શઙ્કરઃ ॥ ૨૨॥

વૃક્ષે સમાને વિહગૌ નિવિષ્ટા-
વેકોઽક્ષુતે તત્ફલમુચ્ચગોઽન્યઃ ।
પશ્યન્નનશ્નન્ન ભિયસ્સુખાત્મા
તમીશ્વરં સૌમ્યપુરીશમીડે ॥ ૨૩॥

યત્સત્યવાદેન સતાધિગમ્યં
સઙ્ગમ્ય યન્નાતિ વદન્તિ વિજ્ઞાઃ ।

યત્ક્રીડમાત્મજ્ઞતમં સમર્ચ્ય
મર્ત્યોઽભ્યુદેત્યસ્તુ ગતિસ્સ શમ્ભુઃ ॥ ૨૪॥

કામૈષિભિશ્ચ બલરિક્તનરૈરલભ્ય-
સ્સન્યાસહીનતપસાપિ ન લભ્યતે યઃ ।
યલ્લબ્ધિતસ્તુ સુધિયસ્સરિતો યથાબ્ધિ
યં સંવિશન્તિ વિકલાસ્તમુમેશમીડે ॥ ૨૫॥

Footnotes ૧ વિલીન કલાઃ

## સપ્તમઃ સ્તબકઃ

પ્રણવેનાભિધેયં યત્ પ્રણવૈકકલેવરમ્ ।
પ્રણવેનોપલક્ષ્યઞ્ચ તં વન્દે કાશિકાપતિમ્ ॥ ૧॥

અયમાત્મા પરમ્બ્રહ્મ બ્રહ્મચૈતચ્ચરાચરમ્ ।
ચતુશ્ચરણસંયુક્તં તં વન્દે કાશિકાપતિમ્ ॥ ૨॥

જાગ્રત્ સ્થાનો વહિઃ પ્રજ્ઞઃ સ્થૂલાન્ ભુઙ્ક્તેહિ યોઽઙ્ગવાન્ ।
વિશ્વાત્મના વિશ્વમૂર્ત્તિં તં વન્દે કાશિકાપતિમ્ ॥ ૩॥

સ્વપ્નસ્થાનોઽવહિઃ પ્રજ્ઞઃ સૂક્ષ્માન્ ભુઙ્ક્તેઽથ યોઽઙ્ગવાન્ ।
તૈજસી ભૂયવિશ્વેશં તં વન્દે કાશિકાપતિમ્ ॥ ૪॥

સુપ્તિસ્થાનો ઘનપ્રજ્ઞઃ સુખં ભુક્તે ચ યઃ સ્વયમ્ ।
પ્રાજ્ઞનામ્ના પ્રવોધાત્મા તં વન્દે કાશિકાપતિમ્ ॥ ૫॥

અદૃશ્યોસ્વ્યવહાર્યો યશ્શિવશ્શાન્તશ્ચ નિર્દ્વયઃ ।
અપ્રજ્ઞશ્શુદ્ધતુર્યાત્મા તં વન્દે કાશિકાપતિમ્ ॥ ૬॥

અકારેણ તથોકારમકારાભ્યાઞ્ચ સંસ્થિતઃ ।
ઓઙ્કારાત્મા યસ્તુરીયસ્તં વન્દે કાશિકાપતિમ્ ॥ ૭॥

ઓઙ્કારાત્મા મહાનિન્દ્રઃ(૧)પ્રજ્ઞાં પ્રજ્ઞાનમેવ ચ ।
યો દદાતિ તદર્થિભ્યસ્તં વન્દે કાશિકાપતિમ્ ॥ ૮॥

અન્નપાને શ્રિયઙ્ગાચ છાત્રાન્ કીર્તિશ્ચ કીર્તિતઃ ।
યો દદાતિ તદર્થિભ્યસ્તં વન્દે કાશિકાપતિમ્ ॥ ૯॥

Footnotes ૧। પરમેશ્વરઃ

યદ્ વ્યાહૃત્યાત્મના પાઙ્ક્ત સ્વરૂપેણ ચ ચિન્ત્યતે ।
ચિન્તકૈર્બ્રહ્મ નિશ્ચિન્તૈસ્તં(૧)વન્દે કાશિકાપતિમ્ ॥ ૧૦॥

સત્યોક્તયા ધર્મચારેણ સ્વાદ્ધ્યાયાધ્યયનેન ચ ।
યદ્બ્રહ્મ સેવ્યતે સદ્ભિસ્તં વન્દે કાશિકાપતિમ્ ॥ ૧૧॥

સત્યં જ્ઞાનમનન્તં યદ્બ્રહ્મવુદ્ધ્હાવિપશ્ચિતઃ ।
ભુઞ્જતે સકલાન્ ભોગાન્ તં વન્દે કાશિકાપતિમ્ ॥ ૧૨॥

વ્યોમવાતાદિકં સર્વે સમ્ભૂતં ભૂતભૌતિકમ્ ।
પ્રત્યગાત્માત્મનો યસ્માત્તં વન્દે કાશિકાપતિમ્ ॥ ૧૩॥

અન્નાદિ પઞ્ચકોશેભ્યો યોઽન્ય આનન્દ આન્તરઃ ।
બ્રહ્મપુચ્છં(૨)પ્રતિષ્ઠા ચ તં વન્દે કાશિકાપતિમ્ ॥ ૧૪॥

યદ્બ્રહ્મ સદ્ઘનં મૂઢો વેદયોઽસચ્છરીરકમ્ ।
અસન્નેવ ભવત્યેષ તં વન્દે કાશિકાપતિમ્ ॥ ૧૫॥

જગત્ સૃષ્ટ્વા તદેવાનુ પ્રાવિશજ્જીવ ભાવભૃત્ ।
કમિતા(૩)ચ તપસ્વીયસ્તં(૪)વન્દે કાશિકાપતિમ્ ॥ ૧૬॥

સચ્ચત્યચ્ચાભવદ્બ્રહ્મ મૂર્તીમૂર્તાત્મકં જગત્ ।
જાજડવિભિન્નં યત્તં વન્દે કાશિકાપતિમ્ ॥ ૧૭॥

રસવદ્બ્રહ્મ યલ્લબ્ધ્વા વુધઃ પિવતિ યદ્રસમ્ ।
રસં વાહ્યં વહિષ્કૃત્ય તં વન્દે કાશિકાપતિમ્ ॥ ૧૮॥

Footnotes ૧ ચિન્તાઽત્ર વિજાતીયવૃત્તિઃ ૨ આનન્દમયાત્મકસ્ય પક્ષિણઃ પુચ્છ ૩ બહુસ્યાં પ્રજાયેય ઇતિ કામયમાનઃ ૪ જગદ્રચનાદિ વિષયકાલોચન તપઃ કુર્વાણઃ

અદૃશ્યેઽનાશ્રયેઽનાત્મ્યે યસ્મિન્બ્રહ્મણિ નિષ્ટયા ।
અભયં વિન્દતે વિદ્વાન્ તં વન્દે કાશિકાપતિમ્ ॥ ૧૯॥

યોઽદ્વયૈકરસે યસ્મિન્નુદરં(૧)કુરુતેઽન્તરમ્ ।
સભયં વિન્દતે ??વાલસ્તં વન્દે કાશિકાપતિમ્ ॥ ૨૦॥

ભિયા યસ્માદ્વાતિ વાયુસ્સૂર્યાની તપતોઽનિશમ્ ।
ધાવતો મૃત્યુરિન્દ્રશ્ચ તં વન્દે કાશિકાપતિમ્ ॥ ૨૧॥

યદાનન્દમહામ્ભોધેર્વિપ્રુષો હિ વપુષ્મતામ્ ।
બ્રહ્માદીનાં ય આનન્દાસ્તં વન્દે કાશિકાપતિમ્ ॥ ૨૨॥

સમ્પ્રાપ્ય યદ્બ્રહ્મવચો વિદૂર-
સાનન્દભાજોઽતિ તરન્તિ ભીતિમ્ ।
શ્રેયોંઽહસી નિર્દહતશ્ચ નૈતાન્
સોદેતુ ચિત્તે મમ શમ્ભુમૂર્ત્તિઃ ॥ ૨૩॥

શાખાનિશાધીશ વદન્તરાત્મા
યોઽન્નાદિ કોશૈરુપલક્ષ્યતેઽદ્ધા ।
સમાધિ(૨)નોદ્ધત્તપસેન્દ્રિયાણાં
સોદેતુચિત્તે મમ શમ્ભુમૂર્ત્તિઃ ॥ ૨૪॥

યદ્બ્રહ્મતામેત્ય બુધોઽભિગાય-
ત્યન્નં તથાત્તાહમહો વિચિત્રમ્ ।
તયોશ્ચ કર્ત્તાદહમેવ સર્વં
સોદેતુ ચિત્તે મમ શમ્ભુમૂર્ત્તિઃ ॥ ૨૫॥
Footnotes ૧ ઉદપિઅરમરૂપં અલ્પમપીત્યર્થઃ ૨ ઇન્દ્રિયાણાં સમાધાનરૂપેણ તપસા ।

## અષ્ટમઃ સ્તબકઃ

યઃ પરાત્મૈક એવાસીદગ્રે કિઞ્ચન નાભવત્ ।
અન્યદ્વસ્તુ સદાખણ્ડં કાશીશં તમુપાસ્મહે ॥ ૧॥

ય ઐક્ષત સૃજે લોકાનિતિલોકાન્ સસર્જ ચ ।
અમ્ભોમુખાન્(૧)લોકપાંશ્ચ કાશીશં તમુપાસ્મહે ॥ ૨॥

અગ્ન્યાદિ લોકપાલાનાં સ્થાનાનિ ચ પિતામહઃ ।
પુરુષે નિરણૈષીદ્યઃ કાશીશં તમુપાસ્મહે ॥ ૩॥

દેહે મુખમધિષ્ઠાનમગ્નેર્વાયોશ્ચ નાસિકે ।
રવેશ્ચ નેત્રે યશ્ચક્રે કાશીશં તમુપાસ્મહે ॥ ૪॥

દિશાં તુ કર્ણૌ શુભ્રાંશોર્હૃદયઞ્ચ મહાપ્રભુઃ ।
યોઽથનાભિં વ્યધાન્ મૃત્યોઃ કાશીશં તમુપાસ્મહે ॥ ૫॥

યો લોક લોકપાલેભ્યસ્સૃષ્ટાન્નઞ્ચ પૃથગ્વિધમ્ ।
પ્રાણેનાગ્રાહયદ્ધાતા કાશીશં તમુપાસ્મહે ॥ ૬॥

મૂર્દ્ધાનં પ્રવિદાર્યૈ તત્ કાર્યકારણસંહતિમ્ ।

પ્રાપદ્યત ચ યઃ સ્રષ્ટા કાશીશં તમુપાસ્મહે ॥ ૭॥

વિદૃતિર્નાન્દનઞ્ચેતિ ગીયતે વેદપારગૈઃ ।
યત્પ્રવેશંસૃતિર્ભક્ત્યા કાશીશં તમુપાસ્મહે ॥ ૮॥
Footnotes ૧ દ્યુલોકઃ દ્યુલોકાત્ પરસ્તાદ્યે મહરાદયો લોકાસ્તે ચામ્ભારશબ્દે ભણ્યન્તે ।

તથા પ્રવિષ્ટો યસ્સાક્ષાજ્જીવભાવેન વેશ્મસુ ।
ત્રિષુ સઙ્ક્રીડતે નિત્યં કાશીશં તમુપાસ્મહે ॥ ૯॥

જાગ્રદાદ્યભિમાનેન સંસરન્ તદ્ગુણાર્દિતઃ ।
ગુરૂક્ત્યાં બ્રહ્મ યઃ પશ્યેત્ કાશીશં તમુપાસ્મહે ॥ ૧૦॥

ગર્ભવાલજરત્તાદિ ચક્રેઽસ્મિન્ જીવનામભૃત્ ।
ઐસિ ભ્રાન્ત્યા બમ્ભ્રમિતિ કાશીશં તમુપાસ્મહે ॥ ૧૧॥

અવિદ્યાજાલકં ભિત્વા શ્યેનવત્ યત્પ્રવોધતઃ ।
નિર્મુક્તો નિશ્ચરેત્ કશ્ચિત્ કાશીશં તમુપાસ્મહે ॥ ૧૨॥

અવિદ્યાકામકર્માણિ વિભિદ્ય વિબુધાગ્રણીઃ ।
(૧)યદ્ભવત્યાત્મભેદે(૨)શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૩॥

કોઽયમાત્મેતિ સંસારાદ્ભયાવિવૃત્સુભિરાત્મનિ ।
અન્વિષ્યતેઽન્વહં યઃ શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૪॥

ચક્ષુર્ભૂતેન મનસા નાનારૂપાણિ પશ્યતિ ।
પ્રત્યાત્મગાત્મના યઃ શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૫॥

શ્રોત્રભૂતેન મનસા નાનાશબ્દાન્ શૃણોતિ ચ ।
પ્રત્યગાત્માત્મના યઃ શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૬॥

ઘ્રાણભૂતેન મનસા ગન્ધાન્ જિઘ્રત્યનૂનકાન્ (૩) ।
પ્રત્યગાત્માત્મના યઃ શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૭॥

વાણીભૂતેન મનસા વક્તવ્યં વ્યાકરોતિ ચ ।
પ્રત્યગાત્માત્મના યઃ શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૮॥
Footnotes ૧ યદ્બ્રહ્મભવતિ તદ્બ્રહ્મરૂપિણં કાશીશમિતિ સમ્બન્ધઃ ૨ દેહપાતે ૩ સવન્ ।

જિહ્વાભૂતેન મનસા જાનાતિ વિવિધાન્ રસાન્ ।
પ્રત્યગાત્માત્મના યઃ શ્રીકાશીશં તમુપાસ્મહે ॥ ૧૯॥

સંજ્ઞાનાજ્ઞાનવિજ્ઞાન(૧)પ્રજ્ઞાનાનિ ચ શેમુષી ।

યદ્બ્રહ્મણોऽભિધાઃ(૨)શ્રીમત્ કાશીશં તમુપાસ્મહે ॥ ૨૦॥

દૃષ્ટિર્ધૃતિશ્ચમનનં મનીષાજૂતિસંસ્મૃતી ।
યદ્બ્રહ્મણોऽભિધાઃ શ્રીમત્ કાશીશં તમુપાસ્મહે ॥ ૨૧॥

સઙ્કલ્પોऽધ્યવસાયોऽસુસ્તૃષ્ણા સ્ત્રીસઙ્ગમસ્પૃહા ।
યદ્બ્રહ્મણોऽભિધાઃ શ્રીમત્ કાશીશં તમુપાસ્મહે ॥ ૨૨॥

બ્રહ્માત્વમદ્રીશભિદદ્વિશાયિન્(૩)
પ્રજાધિભૂશ્ચાદિતિજાસ્ત્વમેવ(૪) ।
પ્રજ્ઞાતનુસ્ત્વં હિ જગત્ પ્રતિષ્ઠા
બ્રહ્માત્મનેતેऽસ્તુ નમો નમસ્તે ॥ ૨૩॥

ત્વમેવ ખં વાયુરથાનલશ્ચ
ત્વમેવ પાથઃ પૃથિવી ત્વમેવ ।
પ્રજ્ઞાતનુસ્ત્વં હિ(૫)જગત્ પ્રકાશો
બ્રહ્માત્મને તેऽસ્તુ નમો નમસ્તે ॥ ૨૪॥

ત્વમેવ ગાવસ્તુરગાનગાશ્ચ
ખગાશ્ચ યત્ કિઞ્ચિદિદં સમગ્રમ્ ।
પ્રજ્ઞાતનુસ્ત્વં હિ જગદ્બિભર્ષિ
બ્રહ્માત્મનેતેऽસ્તુ નમસ્સહસ્રમ્ ॥ ૨૫॥

Footnotes ૧ સંજ્ઞાનાદયઃ અન્તઃકરણવૃત્તિભેદાઃ ૨ ઉપલક્ષકાણિ। ૩ અદ્રીઃ ભિદિન્દ્રઃ ૪ પ્રજાપતિઃ ૫ યતસ્ત્વં પ્રતિષ્ઠા પ્રકાશત્વેન (સત્તાસ્ફૂર્તિ રૂપેણ)જગદ્બિભર્ષિ ધારયસિ તતસ્ત્વમેવેદં સમગ્રમિતિ સંવન્ધઃ

## નવમઃ સ્તબકઃ

ઉદ્ગીથવર્ણે પરમે પરાત્મા
શ્રુત્યેકસારે ચ ગુણોપજુષ્ટે(૧) ।
ઉદ્ગાતૃવર્યૈસ્સમુપાસ્યતે ય-
તમાશ્રયે સૌમ્યપુરાધિનાથમ્(૨) ॥ ૧॥

પ્રાણાત્મનાऽધ્યાત્મમથાધિદૈવં
સૂર્યાત્મના ચાક્ષર(૩)સુપ્રતીકે ।
ઉદ્ગીથવિત્ પશ્યતિ યં હિ દેવં
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૨॥

જ્યોતિર્મયશ્મશ્રુકચોઽર્ક બિમ્બે
કઞ્ચે ક્ષણસ્તિષ્ઠતિ યોગિગમ્યઃ ।
ઉન્નામ ભૃદ્યોય મૃગાદિ ગેષ્ણ-
સ્તમાશ્રયે સૌમ્ય પુરાધિનાથમ્ ॥ ૩॥

હૃન્મન્દિરાન્તઃ સ્થિતમાત્મદેવ-
માનર્ચયં ભૂદિવિષત્ કુમાષૈઃ ।
(૪)ઉષસ્તિરાધોરણ (૫)ભુક્તશેષૈ-
સ્તમાશ્રયે સૌમ્ય પુરાધિનાથમ્ ॥ ૪॥

* નવમે દશમ એકાદશે ચ સ્તવકે છાન્દોગ્યસ્થાનાં, દ્વાદશે ત્રયોદશે
ચતુર્દૃશે ચ બૃહદારણ્યકસ્થાનાઞ્ચ વિષયાણાં સઙ્ગ્રહઃ કૃતઃ
Footnotes ૧ રસતમત્વાદિ ગુણવિશિષ્ટે ૨ સૌમ્યપુરં સૌમ્યકાશીપુરં ૩। ઓઙ્કારરૂપે શ્રેષ્ઠતરપ્રતીકે। ૪ છાન્દોગ્યપ્રસિદ્ધઃ કશ્ચિદૃષિઃ ૫ આધોરણો હસ્ત્યારોહઃ

યાઃ પઞ્ચસપ્તાપિ ચ ભક્તયસ્ત
દ્યુક્તસ્ય સામ્નો ય ઉપાસિતૃણામ્ ।
તત્તદ્ધિયારાતિ ફલઞ્ચ તત્તત્
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૫॥

યજ્ઞાદિભિઃ કૃચ્છ્રમુખૈસ્તપોભિ-
નાપૈતિયં નૈષ્ઠિકચર્યયા(૧)વા ।
લોકસ્સુ લોકો(૨)ભવતીવ ધર્મૈ-
સ્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૬॥

તુર્યાશ્રમી તુર્યપદે હિ યસ્મિન્
ધર્મોજ્ઝિતે બ્રહ્મણિ સંસ્થિતસ્સન્ ।
અમૃત્યુભાવં સમુપૈતિ શશ્વ-
ત્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૭॥

છન્દાંસિ સારો ભુવિ ભૂર્ભુવઃસ્વ-
સ્તત્રાપિ તેષુ પ્રણવોઽખિલાત્મા ।
અગ્રાહિ ધાત્રા સ તુ યત્ પ્રતીક-
સ્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૮॥

આદિત્યગાત્રસ્સુરમાક્ષિકત્વ -
મધ્યસ્ય સદ્ધીભિરુપાસ્યતે યઃ ।

દિવાદયો વંશમુખા હિ યત્ર
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૯॥

Footnotes ૧। નૈષ્ઠિક બ્રહ્મચર્યેણ ૨ પુણ્યલોકવાન્ ।

ગાયત્ર્યુપાધેઃ પુરુષસ્ય યસ્ય
પાદોઽસ્તિ સર્વં જગદાત્મનિષ્ઠમ્ ।
પાદત્રયં વૈકૃતદૂરદૂરં(૧)
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૦॥

શ્રોત્રાક્ષિવાક્ પ્રાણમનોઽભિધાનૈ-
ર્દ્વાઃસ્થૈર્નિરુદ્ધં નૃપતેરિવૈતત્ ।
યદ્બ્રહ્મણો હર્મ્યમગમ્યમસ્મા-
ત્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૧॥

યજ્જ્યોતિષો લિઙ્ગમિહોષ્ણિમાઙ્ગે
કર્ણાપિધાને ચરવોઽન્તરઙ્ગે(૨) ।
યશ્શ્રૂયતે સ્યન્દનનિઃસ્વનાભ-
સ્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૨॥

યજ્જંહિ વિશ્વં યદનં ચ યલ્લં
તસ્માદિદં સર્વમુપાસ્યતે શૈ ।
બ્રહ્મેતિ યત્ સંયત શેમુષીકૈ-
સ્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૩॥

મનોમયં ભાકૃતિ સર્વ કર્મ-
કામાદિ ચ પ્રાણ કલેવરં ચ ।
બ્રહ્મેતિ વિદ્ભિઃ(૩)ક્રિયતે ક્રતુર્ય-
ત્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૪॥

Footnotes ૧ અવિકારીતિ ભાવઃ ૨ અન્તઃશરીરે ૩ વિદ્વદ્ભિઃ

હૃત્ પુણ્ડરીકાન્તરણીય આસ્તે
શ્યામાકતસ્સર્ષપતોઽપિ વા યત્ ।
જ્યાયો દિવો બ્રહ્મ તથાન્તરિક્ષા-
ત્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૫॥

કોશાકૃતિં યં પરિકલ્પ્ય કેચિત્
પુત્રસ્ય દીર્ઘાયુરભીપ્સયૈવ ।

ધ્યાયન્તિ જાપોપ(૧)હિતં કુવુધ્નં(૨)
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૬॥

યદ્ બ્રહ્મબુધ્દ્યા મનસોઽપ્યુપાસ
શ્ચતુષ્પદસ્ય ક્રિયતેઽભિયુક્તૈઃ ।
વાકઃ પ્રાણચક્ષુઃ શ્રવણૈરુમેશં
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૭॥

યદ્બ્રહ્મબુધ્દ્યા ખમુપાસ્યતેઽધિ
દૈવં ચતુષ્પાદનલાનિલાભ્યામ્ ।
અર્કેણ દિગ્ભિશ્ચ મહદ્ભિરુચ્ચૈ-
સ્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૮॥

વાતાત્મના યોઽગ્નિમુખાન્ હિ દેવાન્
સંવૃઙ્ક એષોઽનુવિભાવ્યતેઽતઃ ।
સંવર્ગધર્મેણ મહાવિભૂતિ-
સ્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૧૯॥
Footnotes ૧ જપસહિતં ૨ કુઃ ભૂમિર્બુધ્નો મૂલં યસ્ય તમ્ ।

પ્રાણાત્મનાઽધ્યાત્મમપીક્ષ્યતે ય-
સ્સંવર્ગધર્મે દૃશમધ્યગચ્છત્ ।
શૂદ્રોઽપિ જાનશ્રુતિરેત્યરૈક્કા-
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૨૦॥

પ્રકાશવાનેવ મનન્તવાંશ્ચ
(૧)પ્રદીપ્તિમાનીયતની(૨)ચ પાદાઃ ।
યદ્બ્રહ્મણો ભાન્તિ વિચિન્તકાનાં
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૨૧॥

ચતુષ્પદં બ્રહ્મ ચ ષોડશાંશ
સમુચ્ચિતં યન્મુનિરાદિદેશ(૩) ।
જાબાલકાયૈતદનન્વયાય
તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૨૨॥

પ્રાણો હ્યસૌ બ્રહ્મનિરુક્તમેતત્
કં બ્રહ્મ ખં ચેત્યનલૈસ્ત્રિભિશ્ચ ।
કાર્યેતરાકારમકારણં ય-

ત્તમાશ્રયે સૌમ્યપુરાધિનાથમ્ ॥ ૨૩॥

વશ્યે (૪)ક્ષણૈશ્શમપરૈરપરાજિતૈર્ય-
ચક્ષુસ્થ એષ પુરુષઃ પુરુદૃશ્યતેઽસ્ય ।
સ્થાનેઽપિ સર્પિરુદકં ચ ન સિઞ્ચતિ શ્રી
વિશ્વેશમેતમભયં શરણં પ્રપદ્યે ॥ ૨૪॥
Footnotes ૧ જ્યોતિષ્માન્ ૨ આયતનવાન્ ૩ ગૌતમઃ ૪ વિષયપારવશ્યરહિતૈઃ

ચિત્તે યદક્ષિપુરુષેક્ષકમર્ચિરુચ્ચૈ-
(૧)ર્ઘસ્રાજ્જુનોદગયનાનિ(૨)નયન્તિ વૈધીમ્ ।
સંવત્સરો રવિશશાङ્કશતહૃદાશ્ચ
પશ્ચાત્ પુમાન્પુરમુદેતુ(૩)સ(૪)વિશ્વનાથઃ ॥ ૨૫॥
Footnotes ૧ દિવસશુક્લપક્ષોત્તરાયણાનિ ૨ વૈધીમ્પુરં બ્રહ્મલોકં ૩। ચિત્તે ત્વિત્યન્વયઃ ૪ ઉક્તાક્ષિપુરુષાત્મક ઇત્યર્થઃ

## દશમઃ સ્તબકઃ

પ્રાણાત્મના દેહમુપાશ્રિતો યઃ
શ્રેષ્ઠસ્તથા જ્યેષ્ઠતરશ્ચ નિત્યમ્ ।
બાગાદિકાન્ ધારયતીચ્છયૈષ
મમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૧॥

શ્રદ્ધાદિ જુહ્વત્યનલેષુ દેવા
દ્યુલોકમુખ્યેષ્વથ પૂરુષાત્મા ।
નિષ્પદ્યતે પઞ્ચસુ યઃ પરાત્મા(૧)
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૨॥

પઞ્ચાગ્નિ વિદ્યો ગૃહમેધિવર્ય-
સ્તપોધનો નૈષ્ઠિક વેદગશ્ચ (૨) ।
સૌરાયણં યન્તિ હિ યં ન સદ્યો
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૩॥

પઞ્ચાગ્નિવિદ્યામપઠન્નિગૂઢાઁ
યદ્બ્રહ્મબુદ્ધેરધિરોહિણીં પ્રાક્ ।
પ્રવાહણં ક્ષત્રિયમેત્ય વિપ્રો

નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૪॥

Footnotes ૧ યઃ પરાત્મા પુરુષરૂપેણ નિષ્પદ્યતે ઇતિ યોજના ૨ વેદગો બ્રહ્મચારી ।

ઇષ્ટાદિ કૃદ્‌ભૂમ નિશાસિ તૈષ્યં-
એમાસૈશ્ચ પિત્રા નભસા ચ નીતઃ ।
ચાન્દ્રી પુરીમેતિ હયન્નયાર્ત્યો
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૫॥

ખંવાયુધૂમાભ્રવલાહકાશ્ચ
ધારા ચ વૃષ્ટેર્યવકાદિરેતઃ ।
એતૈઃ પતત્યત્ર સયન્નયાર્ત્યો
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૬॥

કલ્યાણકર્મા કમનીયયોનિં
કપૂયકર્મા ચ કપૂયયોનિમ્ ।
પ્રપદ્યતેઽહ્નેહહ યં ન યાર્ત્યો
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૭॥

વિદ્યાથવેષ્ટાદિ ન સેવ્યતે યૈ-
સ્તે યાન્તિ દંશાદિપદં તૃતીયમ્ ।
પથચ્યુતા યત્ પદદૂરદૂરં
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૮॥

કષ્ટાગતિર્જન્મ જરાદિ દુઃખો-
ત્પ્લષ્ટા હિ યં સંસરણસ્ય ધીરઃ ।
તસ્માજ્જુગુપ્સેત બુભુત્સમાનો(૨)
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૯॥

Footnotes ૧ અસિતઃ કૃષ્ણપક્ષઃ ૨ યં વુભુત્સમાનઃ ઇતિ યોજના ।

દ્યુમૂર્દ્ધ મુખ્યાવયવૈર્વિશિષ્ટં
વૈશ્વાનરં કૃત્સ્નમુપાસતે યમ્ ।
આત્માનમાત્મન્યમલાન્તરઙ્ગા
નમશિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૧૦॥

પ્રાદેશમાત્રં પ્રભુમીશ્વરં યં
વૈશ્વાનરં હ્યશ્વપતેરવાયન્(૧) ।
વિપ્રાશ્ચ રાજન્યપતેરજન્યં

નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૧॥

યેન શ્રુતેન શ્રુતમેવ સર્વં
યચ્ચેન્મતં સ્યાન્મતમેવ સર્વમ્ ।
નિશ્ચિતં નિચિતમેવ સર્વં
નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૨॥

વિકાર એતત્ ખલુનામમાત્રં
જગદ્યથા મૃન્મયમાશ્રયો યઃ ।
મૃત્પિણ્ડવત્ સન્તત સત્યમૂર્ત્તિ-
ર્નમશિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૩॥

વિકાર એતત્ ખલુ નામમાત્રં
જગદ્યથા હૈમમથાશ્રયો યઃ
હેમોપભસ્સન્તત સત્યમૂર્ત્તિ-
ર્નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૪॥

Footnotes ૧ અવાગચ્છન્ ।

વિકાર એતત્ ખલુ નામમાત્રં
જગદ્યથા પૈણ્ડમથાશ્રયો યઃ ।
(૧)પિણ્ડોપમસ્સન્તત સત્ય મૂર્ત્તિ-
ર્નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૫॥

અગ્રે સદાસીદસતઃ કથં સ-
જ્જાયેત યત્ સર્વમિદં સસર્જ ।
ત્રિવૃત્ કૃતૈરગ્નિપુરોગમૈરોં
નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૬॥

પ્રાણાદિ સમ્યગ્ધ્રિયતે ચ યેન
જીવાત્મના વિશ્વમનુપ્રવિશ્ય ।
વ્યાકુર્વતા નામ ચ રૂપમસ્મૈ
નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૭॥

બુદ્ધ્યાદિમાત્રાન્વય જોહિ યદ્વ-
દાદર્શવિમ્બઃ પ્રતિભાતિ(૨)જીવઃ ।
યા દેવતા ન ચ્યવતે મહિમ્નો
નમશ્શિવાયાસ્તુ નમોऽસ્તુ તસ્મૈ ॥ ૧૮॥

તેજોઽબુપૃથ્વીમયમગ્નિતત્વં
તેભ્યો ન ભિન્નં ન ચ વસ્તુતસ્સત્ ।
તથા જગદ્યસ્ય વિકારમાત્રં
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૧૯॥

Footnotes ૧ પિણ્ડમયઃ ૨ તથા જીવઃ પ્રતિભાતીત્યધ્યાહારેણ સમ્બન્ધઃ

તેજોંઽબુપૃથ્વીમય એષ સૂર્ય-
સ્તેભ્યો ન ભિન્નોઽસ્તિ વિવેકકાલે ।
તથા જગન્નાસ્તિ હિરુગ્યતોઽસ્મૈ(૧)
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૨૦॥

તેજોંઽબુપૃથ્વીમય એષ ચન્દ્ર-
સ્તેષાં હિ રક્તાર્જુનકૃષ્ણરૂપૈઃ ।
રૂપી ભવત્યેવમિદં યદીયં
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૨૧॥

તેજોંઽબુપૃથ્વી વિકૃતિશ્ચ વિદ્યુ-
દ્વિચારિતેઽપૈતિ તટિત્ પ્રતીતિઃ ।
તથા યદગ્રે ન જગદ્વિભાત્યોં
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૨૨॥

અન્નસ્ય ધાતુર્જલતેજસોશ્ચ
હૃત્(૨)પ્રાણવાચોઽણુતમોઽભિમાની ।
યસ્તત્ર કર્તૃત્વપદે પતત્યોં
નમશ્શિવાયાસ્તુ નમોઽસ્તુ તસ્મૈ ॥ ૨૩॥

નાશ્નાતિ પઞ્ચદશ ચેત્ પુરુષો દિનાનિ
ભાયાન્ન ષોડશકલઃ પઠિતં હિ કિઞ્ચિત્ ।
તસ્માન્મનોઽન્નમયમમ્બુ પિબેન્નવાધઃ
પ્રાણસ્ય તત્ર(૩)વિહરન્ ગતિરસ્તુ શમ્ભુઃ ॥ ૨૪॥

Footnotes ૧ હિરુક્ પૃથક્ ૨ હૃન્મનઃ ૩ તત્રમનસિ પ્રાણે ચ મનઃ પ્રાણમયત્વેન વિહરન્નિતિ ભાવઃ

પાયાદુપાધ્યુપહિતઃ પુરુષોનુવેલં
ધ્યાયન્નિવ વ્યવહરન્નિવ દૃશ્યમાનઃ ।
યસ્યાં વિવિત્યુપશમે(૧)પરદેવતાયા-
માનન્દધામ્નિ વિનિમજ્જતિ માં સ શમ્ભુઃ ॥ ૨૫॥

Footnotes ૧ વિવિત્તિર્વિશેષવિજ્ઞાનમ્ ।

## એકાદશઃ સ્તબકઃ

શરીરશુઙ્ગો હ્યયમન્નમૂલ-
સ્તસ્યાપિ ચાપોઽગ્નિરપાઞ્ચ મૂલમ્ ।
અગ્નેશ્ચ યન્મૂલમમૂલમેત-
ત્તંવિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧॥

(૧)યતોઽસ્યવાણી મનસિ પ્રશામ્ય-।
ત્યને(૨)મનોઽગ્નૌ સ ચ હવ્યવાહઃ ।
યસ્મિન્પરે બ્રહ્મણિ ચાપ્રકમ્પ્યે
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૨॥

અણિષ્ઠમાત્મા જગતશ્ચ મૂલં
સર્વસ્ય સાક્ષાત્ સુધિયો વિદન્તિ ।
યદ્બ્રહ્મસત્તત્વમસીતિ વાક્યા-
ત્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૩॥

પ્રજાસ્તરૂણાં રસવત્ (૩)સુષુપ્તૌ
સમ્પદ્ય યસ્મિન્ સતિ નિર્વિશેષાઃ(૪) ॥

વાક્યેન યત્તત્વમસીતિ વેદ્યં
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૪॥
Footnotes ૧ યતો મ્રિયમાણસ્ય ૨ અને પ્રાણે ૩ મધુદૃષ્ટાન્તઃ છાન્દોમ્યે ષષ્ઠપ્રપાઠકે નવમખણ્ડે દ્રષ્ટવ્યઃ ૪ નિર્વિશેષા ભવન્તિ એકો ભવન્તીત્યર્થઃ

અન્ધેર્યથાબ્ધિં પ્રવિશન્તિ નદ્યો
વ્યાઘ્રાદયો યદ્ધ્યપિયન્તિ તદ્વત્ ।
વેદ્યં વિચારેણ ચ તત્ત્વમસ્યા-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૫॥

અજીવમેતન્મ્રિયતે શરીરં
વૃક્ષોઽપિ શુષ્યત્યપજીવકશ્ચેત્ ।
સ (૧)એવ સદ્ય ત્રિપદૈકવેદ્યં(૨)
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૬॥

ન્યગ્રોધબીજાદ્વિટપીવ જજ્ઞે
યતસ્તોઽણિમ્ન ઇદં સમગ્રમ્ ।
શ્રદ્ધાવતા યત્રિપદૈશ્ચ વેદ્યં
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૭॥

યથાપ્સુલીનં લવણં ન (૩)પશ્યે-
દણિમ્ન એવં યદલભ્યમક્ષૈઃ ।
ગ્રાહ્યં ચ બુદ્ધ્યા ત્રિપદૈર્ગુરૂક્તૈ-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૮॥

વિક્રોશતાઽબદ્ધ દૃશાસ્વનીવૃ(૪)-
ન્નરેણ ગમ્યેત યથા યથોક્તમ્ ।
આચાર્યવાનૃચ્છતિ યત્રિશબ્દૈ(૫)-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૯॥

Footnotes ૧ સજીવો યત્ સદેવેતિ યોજના ૨ ત્રિપદાનિ તત્ત્વમસીત્યેત ૩ પુરુષ ઇતિ શેષઃ ૪ સ્વદેશઃ ૫ તત્ત્વમસીતિ ત્રિશબ્દૈઃ

મૂર્ખો મુમૂર્ષુસ્સતિ યત્ ક્રમેણ
વિદ્વાન્મુમુક્ષન્નપિ તાદૃશૈવ ।
સમ્પદ્યતે યત્ર પદત્રયેણ
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૦॥

સમ્પદ્ય યસ્મિન્ન બુધોઽયુધસ્તુ
પ્રપદ્યતે જન્મમૃષાભિસન્ધઃ ।
(૧)જ્વલત્કુઠારગ્રહવન્ત્રિગમ્યં
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૧॥

શાસ્ત્રાણ્યધીત્યાપિ શુશોચ મોહા-
(૨)ન્મહર્ષિરાત્માનવબોધહેતોઃ ।
યદાત્મયા જીહાશુગાત્પતુષ્ટ-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૨॥

યદ્બ્રહ્મબુદ્ધ્યાહ્વયવાઙ્મનાંસિ
સઙ્કલ્પચિત્તે ચ વિચિન્તયન્તિ ।
ધ્યાનઞ્ચ વિજ્ઞાનમથોબલઞ્ચ
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૩॥

અન્નઞ્ચ પાથોગ્નિમનન્તકઞ્ચ(૩)
સ્મૃતિં તથાશા મથં સૂત્રદેવમ્ ।
બ્રહ્મેતિ યત્ સુષ્ઠુ વિદન્તિ સન્ત-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૪॥

Footnotes ૧ પરશુગ્રહણદૃષ્ટાન્તોઽપિ તત્ર ષોડશે ખણ્ડે દ્રષ્ટવ્યઃ ૨ નારદઃ ૩ આકાશઃ ।

સત્યસ્ય વિજ્ઞાનમથાસ્ય તર્કઃ
શ્રદ્ધાસ્ય નિષ્ઠાથ ચ હેતુરસ્યાઃ ।
તસ્યાઃ ક્રિયા(૧)યત્ સુખમેવ તસ્યા-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૫॥

સુખન્તુ ભૂમા નહિ સૌખ્યમલ્પે
યસ્મિન્નદૃગ્દૃશ્ય વિભિત્તિલેશઃ ।
યો વૈ મહિમ્નિ પ્રતિતિષ્ઠતિ સ્વે
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૬॥

સ્વાત્માચ ભૂમા પુરતશ્ચપશ્ચા-
દ્યસ્માત્ સમદ્ભૂતમશેષ વિશ્વમ્ ।
સ્વારાજ્યવાન્ ક્રીડતિ યદ્વિજાનન્ ।
તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૭॥

આહારશુદ્ધૌ ખલુ સત્વશુદ્ધિ-
સ્તસ્યાઞ્ચ ભૂમાત્મનિ નિશ્ચલાધીઃ ।
યસ્મિંસ્તતશ્ચાખિલ પાશમોક્ષ-
સ્તં વિશ્વનાથં શરણં પ્રપદ્યે ॥ ૧૮॥

બ્રહ્માલયે દહરસત્મનિ(૩)પત્મતુલ્યે
યદ્બ્રહ્મ ખાદપિ મહત્તરમન્તરાસ્તે ।
નાંહો ન તૃટ્ ક્ષુદજરશ્ચ વિમૃત્યુશોક-
સ્સત્યેચ્છ(૩)સત્યકલનશ્ચ ગતિસ્સ શમ્ભુઃ ॥ ૧૯॥

Footnotes ૧ ઇન્દ્રિયસંયમઃ ૨ દહરમલ્પતરં ૩ સત્યકામઃ સત્યસઙ્કલ્પ

યદ્વત્ સુવર્ણનિધિમૂર્દ્ધ્વ ચરા અપીમે
યદ્બ્રહ્મહન્તહૃદિશં હ્યનૃતાપિધાનાઃ(૧) ।
યન્તસ્તથાઽપ્યહરહર્ન લભન્ત એત-
(૨)લ્લોકાસુલોકનિલયોઽસ્તુ ગતિસ્સ શમ્ભુઃ ॥ ૨૦॥

યસ્સેતુરેષ જગતાં (૩)વિધૃતિર્વિભાત-
શ્શશ્વન્ન યત્ર દિનરાત્રિકથાપ્રસઙ્ગઃ ।
યોષા વિતૃષ્ણમતિરેવ ન વાક્પ્રવીણો
યં પ્રાપ્તુમર્હતિ સદાસ્તુ ગતિસ્સ શમ્ભુઃ ॥ ૨૧॥

નીલાશ્ચ રક્તધવલા હૃદયસ્ય નાડ્ય-
સ્સૂક્ષ્મા હિ તત્ર ઘૃણયો(૪)મિહિરસ્ય તાસુ ।
સૂર્ધ્ન્યયા રવિમતો દુહિણં(૫)તતશ્ચ
સંયાતિ યદ્દહરવિત્ સ હરો ગતિર્મે ॥ ૨૨॥

અક્ષિસ્થ એષ પુરુષઃ ખલુ દૃશ્યતે યો
બ્રહ્મૈતદેતદભયં હ્યસુરઃ(૬)પ્રજેશાત્(૭) ।
શ્રુત્વૈવમમ્બુગતબિમ્બમવેક્ષ્ય ચાત્મા
યો(૮)દેહ ઇત્યધિજગામ ગતિસ્સ (૯)શમ્ભુઃ ॥ ૨૩॥

શ્રુત્વા ચાક્ષુષપૂરુષં ગુરુમુખાચ્છાયેતિ જગ્રાહ યં
પઞ્ચાદ્દોષમવેક્ષ્ય તત્ર મઘવાન્ શુશ્રાવ યં સ્વાપ્નિકમ્ ।
Footnotes ૧ સ્ત્ર્યાદિ વિષયતૃષ્ણયા વહિરપકૃષ્ટચેતસઃ ૨ પિત્રાદિ લોકાનામા- ધારભૂતઃ ૩ વિધારકઃ ૪ રશ્મયઃ ૫ હિરણ્યગર્ભં ૬ વિરોચનઃ ૭ પ્રજાપતેઃ ૮ ય આત્માદેહ ઇત્યધિગતવાન્ ૯ તદાત્મરૂપઃ

સૌપ્તઞ્ચાપ્રિયવિત્તિમન્ધતમસં(૧)ચાત્રાપિ પશ્યંસ્તત-
સ્તુર્યં બ્રહ્મતયા ગ્રહીદ્યમભયં દદ્યાત્ સ કાશીપતિઃ ॥

મૃત્યુપ્રસ્તમિદં શરીરમમૃતો હ્યાત્મા શરીરોજ્ઝિતઃ
દેહાધ્યાસકૃતં પ્રિયાપ્રિયશતં હિત્વા ચ તદ્ભાવનામ્ ।
નિષ્પદ્યેત નિજાત્મનાऽऽત્મનિરતો વિદ્વાનદભ્રાદ્ધકૈ-
શ્શ્રુત્વેન્દ્ર(૨)ઇયાય યત્પરપદં પાયાત્સ કાશાપતિઃ(૩) ॥
Footnotes ૧ પુત્રાદિ મરણાદીનામપ્રિયાણામનુભવં ૨ ઇતિ બહુવત્સરૈઃ ઇન્દ્રો યત્ પરપદમિયાય ઇત્યન્વયઃ ૩ તત્પરપદાત્મકઃ

## દ્વાદશઃ સ્તબકઃ

હયક્રતુપ્રાગ્ર્ય સમગ્રકર્મભિ-
સ્સમુચ્ચિતો પાસ્તિભિરપ્યતદ્વિદા ।
ન લભ્યતે ભવ્યમભવેય(૧)વસ્તુ ય-

ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧॥

પ્રજેશમધ્યસ્યતિ(૨)મેદ્ધ્યસૈન્ધવે
યમગ્નિવાય્વાર્યમભાવભૃચ્ચ યઃ ।
ક્રિયાફલં કારકમપ્યયં વિરાટ્
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૨॥

યમશ્મસઙ્ઘટ્ટિત પાંસુપિણ્ડવ-
દ્વિશીર્યતે પઙ્મભિદ્રવત્(૩)સ્વયમ્ ।
ઉપાસ્યરૂપં હ્યનરૂપરૂપિણં
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૩॥

વિરાટ્ સ્વરૂપેણ ય એકલઃ પુરા
વિભાય(૪)પશ્ચાદ્બુબુધે ન કિઞ્ચન ।
મદન્યદસ્તીતિ તતઃ કુતો ભયં
તમાશ્રયામ્યુત્તર કાશિકાધવમ્ ॥ ૪॥

Footnotes ૧ અભવ્યં નિત્યસિદ્ધં ૨ અશ્વમેધાધિકારીતિ શેષઃ ૩ પઙ્કં પાપ્મા, ૪ ભીતવાન્ ।

સુતાત્ સુવર્ણાદથ દૈવવિત્તતો-
પ્યતિપ્રિયોઽભ્યન્તર એષ પૂરુષઃ ।
વિનઙ્ક્ષ્યતિ હ્યન્યદશેષમાત્મન-
સ્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૫॥

સુરાશ્ચ સર્વત્વમગુર્નરર્ષયો
યદાત્મબોધેન તતોઽભવં(૧)મનુઃ ।
રવિશ્ચ હેત્યૈક્ષત વામદૈવતં
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૬॥

સ્તુતિપ્રણામપ્રણિધાનપૂજનૈ-
ર્યદાત્મનોઽન્યાં ભજતેઽનુદેવતામ્ ।
ય આત્મઘાતી સ પશુર્દિવૌકસાં
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૭॥

પિતૃસ્વરૂપેણ ચ યોઽન્ન સપ્તકં
વિધાય જન્તૂન્ વિબુધાન્ પશૂનપિ ।
અભાજયત્ સ્વઞ્ચ યથાસ્વમેવ(૨)ત-
ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૮॥

મનોમયઃ પ્રાણમયોऽથ વાઙ્મયઃ
પિતૃત્વમાસાદ્ય જિઘત્સતીવ યઃ ।
ફલાન્યજન્મા નિજકર્મયન્ત્રિત -
સ્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૯॥

Footnotes ૧ મનુઃ રવિશ્ચાભવં ઇતિ વામદૈવતં વામદેવઃ ઐક્ષતહ દૃષ્ટવાન્ ૨ યથાસ્વં યથાયોગ્યં

મનુષ્યલોકસ્સ્વસુતેન કર્મણા
પિતુશ્ચ લોકસ્સુરવેશ્મવિદ્યયા ।
વિજય્ય એતૈર્ન વિજીયતે તુ ય-
સ્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૦॥

ભવોऽયમવ્યક્ત તદન્ય(૧)લક્ષણ-
સ્ત્રયં હિ વૈ નામ ચ રૂપ કર્મણી ।
અતો વિરજ્યેત બુધો યદીપ્સયા
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૧॥

રવીન્દુ વિદ્યુત્ પ્રમુખેષુ પૂરુષો
વિચિન્ત્યતે બ્રહ્મ તદન્યદૂચિવાન્ ।
અજાતશત્રુર્મુનયેऽપિ(૨)યત્ પરં
તમાશ્રયામ્યુત્તરકા શિકાધવમ્ ॥ ૧૨॥

હૃદમ્બુજે વ્યોમનિયત્ર ધીમય-
સ્સુખેન શેતે(૩)નૃપબાલવિપ્રવત્ ।
અખણ્ડ સદ્બ્રહ્મ તદેવ સાક્ષિચિ-
ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૩॥

વિદન્તિ યં પ્રાણ શરીરકં શિશું
શરીરમાધાનમમુષ્ય(૪)કેચન ।
(૫)શિરોવરાધાનમથાન્નબન્ધની(૬)
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૪॥

Footnotes ૧ અવ્યાકૃત વ્યાકૃતાત્મકઃ ૨ મુનિરત્ર ગાર્ગ્યઃ ૩ સુષુપ્તાવિતિ શેષઃ ૪ આધાનમધિષ્ઠાનં ૫ વરાધાનં પ્રત્યેક સ્થાનં ૬ અન્નમેવ વન્ધનરજ્જુઃ

સદસ્તિ મૂર્ત્તં કુજલાનલાત્મકં
ત્યદસ્ત્યમૂર્ત્તં મરુદંવરાત્મકમ્ ।

અતીત્ય ચૈતેઽવધિભૂર્વિભાતિ ય-
ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૫॥

ન વિત્તપૂર્ણા ચલયા ચ લભ્યતે
યદાત્મભાવામૃતભાવનિર્વૃતિઃ ।
(૧)સુખં સુખાન્યાહરતીવ વિત્તવાન્
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૬॥

યદાત્મકામાય પતિઃ પ્રિયો ભવે-
દ્યદાત્મકામાય ચ કામિની પ્રિયા ।
યદાત્મકામાય સુતઃ પ્રિયો ભવે-
ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૭॥

યદાત્મકામાય વસુ પ્રિયં ભવે-
તથા ચ લોકામરજન્તવઃ પ્રિયાઃ ।
યદાત્મનોઽર્થે નિખિલં ચ વલ્લભં
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૮॥

યદાત્મનઃ પ્રેષ્ઠતમસ્ય દૃષ્ટયે
શ્રુતિર્મતિર્ધ્યાનમપિ પ્રકીર્ત્યતે ।
તથા વિદન્ બ્રહ્મભવત્યશેષવિ -
ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૧૯॥
Footnotes ૧ અનાયાસેન ।

યદાત્મનોઽન્યત્ર સુરાદિકાન્ વિદન્
પરાક્રિયેતાશતમસ્સદુષ્કૃતૈઃ ।
જગત્સમસ્તં હિ (૧)સતત્વમાત્મન-
સ્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૨૦॥

ન કિઞ્ચિદસ્તિ વ્યતિરેકતશ્ચિતે-
સ્તતસ્તદાત્મત્વમનાત્મવસ્તુનઃ ।
(૨)નિનાદવદ્દુન્દુભિશઙ્ખયોર્ભૃશં
તમાશ્રયાસ્યુત્તરકાશિકાધવમ્ ॥ ૨૧॥

યથા પૃથન્ધૂમકણા(૩)ધનઞ્જયા-
તથાર્ગ્યજુસ્સામ ચ નિસ્સરન્તિ હિ ।
યતઃ પરાન્નિશ્વસિતોપમં નરા(૪)-

ત્તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૨૨॥

વિલીયતેઽક્ષે(૫)વિષયસ્તદાત્મનિ(૬)
ધિયાઽચ્ચસોઽપ્યાત્મનિ યત્ર શેમુષી ।
અનન્તવિજ્ઞાનઘનેઽપ્સમુદ્રવત્(૭)
તમાશ્રયામ્યુત્તરકાશિકાધવમ્ ॥ ૨૩॥

Footnotes ૧ સતત્વં સ્વરૂપં ૨ દુન્દુભિશઙ્ખદૃષ્ટાન્તૌ બૃહદારણ્યકે દ્વિતીયાધ્યાય-ગત ચતુર્થ બ્રાહ્મણદ્રવ્યૌ ૩ ધૂમાથ અભિકણાશ્ચ ૪ પરમાત્મનઃ ૫ પ્રલયાદિષ્વિતિ શેષઃ ૬ મનસિ ૭ યથા આપસ્સમુદ્રએકી ભવન્તિ તદ્વદિત્યર્થઃ

લવણશકલમપ્સુ પ્રાસ્તમસ્તં ગતં સ-
ત્તદનુપૃથગમૂભ્યશ્શક્યતે નોદ્ગ્રહીતુમ્ ।
વિદપિયદપિયાતસ્તદ્વદુદ્ભિન્નમાત્રો(૧)
ભવતિ ન બહુસંશસ્તં(૨)ભજે વિશ્વનાથમ્ ॥ ૨૪॥

સ્ફુટસમુદિતસમ્યગ્વિત્તિતો યસ્ય ભિત્તિ(૩)-
ર્વ્યપસરતિ સમૂલં વિશ્વમાત્મૈવ ભાતિ ।
તદનુકથમુતિષ્ઠેત્ કર્તૃકર્મક્રિયાદિ-
વ્યવહૃતિ રસતીયં વિશ્વનાથસ્સમાઽવ્યાત્ ॥
Footnotes ૧ માત્રાદેહેન્દ્રિયાદયઃ ૨ સંજ્ઞાવિશેષજ્ઞાનં ૩ ભેદઃ

## ત્રયોદશઃ સ્તબકઃ

પૃથ્વીસમસ્તજનિમન્મધુજન્તુવર્ગઃ
પૃથ્વીમધુદ્વિવિધપૂરુષ એષ પૃથ્વ્યામ્ ।
મૂર્ત્યાઽચ્ચ(૧)યસ્સ મધુતન્મધુકારણાત્મા
બ્રહ્માસ્તિ યત્તમનિશં સ્સર વિશ્વનાથમ્ ॥ ૧॥

પૂષા સમસ્તજનિમન્મધુજન્તુવર્ગઃ
પૂષ્ણોમધુદ્વિવિધપૂરુષ એષ પૂષ્ણિ ।
નેત્રે ચ યસ્સમધુ સર્વમધૂદ્વહં સ-
દ્બ્રહ્માસ્તિ યત્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૨॥

યદ્બ્રહ્મભૂતવિબુધે નિખિલાત્મભૂતે
ભૂતાનિ ચેન્દ્રિયગણાભુવનાત્મદેવાઃ(૨) ।
સર્વેઽર્પિતાસ્સમમરા ઇવ ચક્રનાભૌ

રે રે મનસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૩॥

યોઽયં પરાત્પરતરઃ પુરુરૂપધારી
માયાવશાત્ પ્રતિશરીરમનુપ્રવિશ્ય ।
સર્વાનુભૂર્ભવતિ નિર્ભયશોકમેકં
રે રે મનસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૪॥
Footnotes ૧ શરીરે ૨ ભુવનાનિ ભૂરાદીનિ આત્માનો વિજ્ઞાનમયાઃ દેવા અગ્ન્યાદયશ્ચ ।

પુણ્યેન પાપપટલેન ચ તત્તદેત્ય
જન્મેહ હન્ત વિષયેન્દ્રિયમૃત્યુચક્રે ।
ભ્રામ્યત્યનારતમવૈતિ ન મૃત્યુમૃત્યું
યં કર્મઠસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૫॥

પારિક્ષિત(૧)પ્રભૃતયઃ પુરુપુણ્યપુઞ્જ -
ભાજોઽપિ સૂત્રભુવનાદિ(૨)ભવપ્રભેદાન્ ।
ગચ્છન્તિ મોક્ષભવનં ન વિશન્તિ યસ્ય
રે રે મનસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૬॥

સાક્ષાદ્યદસ્તિ નિખિલાત્મકમાત્મવસ્તુ
વિજ્ઞાતિ વિજ્ઞમથ સંહતિ(૩)સન્નિયન્તૃ ।
બ્રહ્માદ્વયં યદિ તરત્ ખપુરીવ ચર્ત(૪)
રે રે મનસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૭॥

યદ્બ્રહ્મ ચૈકમખિલાન્તરમસ્યવિત્ત્યૈ(૫)
પ્રત્યક્ ષડૂર્મિરહિતં ગુણિનો(૬)હ્યગૌણમ્ ।
ભિક્ષાર્થિનસ્સ્વયમટન્તિ બુધા વિધૂય
વિશ્વૈષણાસ્તમનિશં(૭)સ્મર વિશ્વનાથમ્ ॥ ૮॥

યદ્બ્રહ્મબોધમભિકાઙ્ક્ષ્ય બુધાનિરીહા
મુણ્ડાવિવર્ણવસનાશ્ચ વિવર્ણલિઙ્ગાઃ(૮) ।
Footnotes ૧ પારિક્ષિતા અશ્વમેધયાજિનઃ ૨ બ્રહ્મલોકાદિ સંસૃતિ ૩ સંહતિઃ કાર્યકરણસઙ્ઘાતઃ ૪ આર્ત વિનાશિ ૫ બોધાય ૬ ગુણસમ્પન્નાઃ ૭ સર્વા એષણાઃ ૮ વર્ણલિઙ્ગરહિતાઃ

આરણ્યકેષુ(૧)વિચરન્તિ ચ યત્ પ્રબુદ્ધા(૨)
નિષ્કિઞ્ચનાસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૯॥

નિશ્શેષમેતમવબુદ્ધ્યયમાત્મવિદ્ય-

દ્વિજ્ઞાનનિષ્ઠિતમતિર્મનનૈકશીલઃ ।
પાણ્ડિત્યવાલ્યમુનિતાભિરકૃત્યશેષ-
સ્સર્વીભવેત્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૦॥

યદ્બ્રહ્મ સમ્યગવગચ્છતિ યો મહાત્મા
પ્રત્યક્તયા ભવતિ વિશ્વતનુશ્ચ વિદ્વાન્ ।
સ બ્રાહ્મણસ્સ પુરુપૂજ્યતમસ્સ ધન્ય-
સ્તસ્મૈ નમસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૧॥

વર્ણાશ્રમાસ્પૃગશરીર પદે હિ યસ્મિન્
તાદૃઙ્ધિયૈવ વિહરેદિહ યો વિપશ્ચિત્ ।
સ બ્રાહ્મણસ્સ બહુમાન્યતમસ્સ ધન્ય-
સ્તસ્મૈ નમસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૨॥

વિપ્રોહમાઢ્યકુલવાનિતિ મન્યમાનો
ન બ્રાહ્મણશ્ચિદહમિત્યનુચિન્તયન્(૩)યત્ ।
સ બ્રાહ્મણસ્સ બહુમાન્યતમસ્મ ધન્ય-
સ્તસ્મૈ નમસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૩॥

ઓતઞ્ચમિશ્રિતમમિશ્રિત(૪)ભૂતવર્ગે
પ્રોતઞ્ચસોઽથસકલાશ્રયસૂત્રદેવે ।
Footnotes ૧ ઉપનિષત્સુ અરણ્યેષુચ ૨ યદપરોક્ષજ્ઞાનિનશ્ચ ૩ યશ્ચિદ્રૂપં હ્યાહમિત્યનુચિન્તયન્નસ્તીતિ યોજનીયં ૪ પઞ્ચીકૃત ભૂતપઞ્ચકમ્ ।

પ્રાણાત્મનિ સ્વયમતર્ક્યમહિમ્નિ સોપ્યુ-
દ્ભૂતો યતસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૪॥

સૂત્રઞ્ચ સઙ્ગ્રથિતસર્વજગદ્યથા સ્રક્
સૂત્રેણ તસ્ય ચ નિયન્તૃ યદન્તરસ્થમ્ ।
જાનન્ ભવત્યમરવિત્ સ્વપરત્રયીવિ(૧)-
ન્નિશ્શેષવિત્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૫॥

પૃથ્વ્યાં સ્થિતોઽન્તરતરો યમકૃન્ન(૨)પૃથ્વી
યં વેદ યસ્ય પૃથિવી તનુંરાત્મભૂતમ્ ।
સર્વસ્ય નિર્વપુષમસ્તસમસ્તધર્મં
નારાયણં તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૬॥

તિષ્ઠન્ જલે નિયમકૃચ્ચ જલસ્ય યો યં
નો વેત્તિ કં જલતનુશ્ચ જલાન્તરાસ્તે ।
આત્મા ચ કૃત્સ્ન જગતો હ્યભવી(૩)ચ યઃ શ્રી
નારાયણં તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૭ ॥

ભૂતેષુ તિષ્ઠતિ સમેષુ નિયામકશ્ચ
તેષાં હિ ભૂતતનુરતરગન્ધ યોઽસૌ ।
નાવૈતિ ભૂતતતિરાત્મદૃશિં ચ યં શ્રી
નારાયણં તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૮ ॥

દ્રષ્ટા ન દૃષ્ટિવિષયઃ શ્રુતિગોચરો ન
શ્રોતાઽમતો મનનકૃચ્ચ ન બુદ્ધિબોધ્યઃ ।
Footnotes ૧ સ્વચપરાણિ ભૂતાનિ ચવેન્દાંશ્ચ વેત્તીતિ ૨ યો નિયમકૃદ્ધ ધ્યાહૃત્યયોજનીયં ૩ અસંસારી ।

બોદ્ધા ચ યોઽન્યરહિતશ્ચ યદન્યદાર્ત્તં
સ્રક્સર્પવત્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૧૯ ॥

સર્વેઽપિ યેન વિધૃતાઃ ખલુ લોકિલોકાઃ
સોઽવ્યાકૃતે(૧)નભસિ તત્તુ યદક્ષરે ચ ।
ગાઙ્ગેયકુણ્ડલનિભં પ્રતિતિષ્ટતિ શ્રી-
સચ્ચિદ્ધનં તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૨૦ ॥

અસ્થૂલમેતદનણુશ્રવણાક્ષિવાણી-
હીનંહ્યલોહિતમવાહ્યમનન્તરં ચ ।
અપ્રાણમસ્ત ગુણમસ્તિ યદેવ ભોક્તૃ
ભોજ્યેતરત્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૨૧ ॥

યસ્ય પ્રશાસનમહિમ્ન ઇમૌ રવીન્દૂ
સ્વસ્વોદયાસ્તમયકર્મણિ નિષ્ઠિતૌસ્તઃ ।
સ્વશ્ચસ્થિરાસ્થિરતરં સ્ફુટનાદ્યપેતં
(૩)નિસ્તિષ્ઠસ્તમનિશં(૪)સ્મર વિશ્વનાથમ્ ॥ ૨૨ ॥

યસ્ય પ્રશાસનમહિમ્ન ઇમે ચ કાલા
માસર્તુવત્સરપરાઃ કલયન્તિ જન્તૂન્ ।
નદ્યઃ સ્રવન્તિ ધવલાદ્રિમશૈલતશ્ચ
ગઙ્ગાદયસ્તમનિશં સ્મર વિશ્વનાથમ્ ॥ ૨૩ ॥

યજનતપનબુદ્ધિર્બુદ્ધ્યતે યન્ન યસ્સં-
સરતિ સ કૃપણો યસ્ત્વક્ષરં બ્રહ્મસમ્યક્ ।
Footnotes ૧ સૂત્રદેવઃ ૨ સુવર્ણકુણ્ડલન્યાયેનેત્યર્થઃ ૩ સ્વદ્યુલોકઃ સ્થિરા ભૂમિઃ

વિગતવિષયતૃષ્ણો વેત્તિ સ બ્રહ્મભૂતો
ભવતિ ભવવિમુક્ત્યૈ ભાવયેતદ્ભવાઙ્ઘ્રિમ્(૧) ॥ ૨૪॥

અચલિતચિન્તિમાત્રં હ્યક્ષરં બ્રહ્મયદ્વૈ
પ્રચલિતતનુતન્વાં(૨)દર્શનાદિક્રિયાકૃત્ ।
સકલ (૩)સજનુરન્તર્યન્તૃચોપાધિભેદા-
દ્ભવતિ ભવવિમુક્ત્યૈ ભાવયેતદ્ભવાઙ્ઘ્રિમ્ ॥ ૨૫॥
Footnotes ૧ તસ્યભવસ્ય વિશ્વનાથસ્ય અઙ્ઘ્રિપાદં ૨ દેહે ૩ સઞ્જનુષઃ

## ચતુર્દશઃ સ્તબકઃ

પ્રાણાત્મનો યસ્ય મહાવિભૂતે-
ર્વિસ્તારમાત્રં હિ સમસ્તદેવાઃ ।
અનન્તસઙ્ખ્યા ચસુરુદ્રમુખ્યા-
સ્સ સૌમ્યનાથઃ (૧)શ્રિયમાદધાતુ ॥ ૧॥

સર્વઞ્ચ નામાકૃતિકર્મરૂપં
પ્રતિષ્ઠિતં વૈ હૃદિ સા ચ દેહે
ઉભે ચ યસ્મિન્ ક્રમશઃ પરસ્મિન્
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૨॥

યન્નેતિ નેતીતિ નિષેધવાચા
નિર્દિશ્યતેઽગૃહ્યમશીર્યમેતત્ ।
અસક્તબદ્ધા વ્યથમાત્મતત્વં
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૩॥

પ્રત્યક્ષતર્કાદ્યખિલપ્રમાણૈઃ
પ્રમીયતે ન (૩)શ્રુતિમૂર્દ્ધભિન્નૈઃ ।
યઃ પુરુષઃ પ્રત્યગખણ્ડબોધઃ
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૪॥
Footnotes ૧ બ્રહ્મવિદ્યા પ્રયુક્તાં શ્રિયમિત્યર્થઃ ૨ નામરૂપકર્માત્મકં વેદાન્તવ્યતિરિક્તૈઃ

વૃક્ષે વિશીર્ણે સમુદેતિ બીજા-
ન્નવીનવૃક્ષસ્સદણિમ્ન ઇત્થમ્ ।
યતઃ પ્રરોહન્તિ મૃતા મનુષ્યાઃ
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૫॥

વિજ્ઞાનમાનન્દઘનં યદસ્તિ
દાતુઃ પરં બ્રહ્મફલં પ્રયચ્છત્ ।
મુક્તોપસૃપ્યઞ્ચ શિવં પ્રશાન્તં
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૬॥

વાક્ પ્રાણચક્ષુઃ શ્રવણાનિ ચિત્તં
બ્રહ્મેતિ બુદ્ધ્વા હૃદયઞ્ચ વિદ્વાન્ ।
યદ્બ્રહ્મ વિજ્ઞાતુમગૌણમર્હત્(૧)
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૭॥

આદિત્યચન્દ્રાગ્નિવચાંસિ યત્ર
શામ્યન્તિ મર્ત્યઃ કુરુતે તદાત્વે ।
યજ્જ્યોતિષાકર્મનિજાત્મરૂપ-
સ્સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૮॥

યજ્જ્યોતિરન્તર્હૃદિ પૂરુષાખ્યં
પરત્ર ચાત્રાપિ મતિપ્રધાનમ્ ।
ચરત્યથ ધ્યાયતિ ખેલતીવ
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૯॥

Footnotes ૧ મુખ્યમ્ ।

યઃ પૂરુષાત્મા વિષયેન્દ્રિયાર્થૈ-
સ્સઙ્કીર્ણભાજાગ્રતિ ભાત્યકીર્ણઃ
સ્વપ્ને સ્વયં જ્યોતિરલુપ્તદૃષ્ટિઃ
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૧૦॥

રથાન્તુરઙ્ગાનથ રાજમાર્ગાન્
સરાંસિ યોઽસૌ સૃજતે સ્રવન્તીઃ ।
મોદ પ્રમોદાનપિ પૂરુષાત્મા
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૧૧॥

ઉચ્ચાવચાન્ સંસ્કૃતિમાત્રરૂપાન્

નિર્માય નારીનગરાદિકાન્ યઃ ।
ભુઙ્ક્તે સ્વયમ્ભાસ્તુવિવિક્તમૂર્ત્તિ-
સ્સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૧૨॥

સ્વપ્ને ચ યો જાગ્રતિ જાગરૂક-
સ્તત્ પુણ્યપાપાનનુબદ્ધ એવ ।
સઙ્ક્રીડતેઽયં પુરુષો હ્યસઙ્ગઃ
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૧૩॥

યસ્સમ્પ્રસાદે(૧)ચ નિજસ્વરૂપે
સ્ફુરત્યપાસ્તાર્તિશતસ્સુખાત્મા ।
સ્વયમ્પ્રભોઽયં પુરુષો હ્યસઙ્ગઃ
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૧૪॥
Footnotes ૧ સુષુપ્તે

સ્વપ્ને ચ યો જાગ્રતિ મત્સ્યતુલ્ય(૧)-
શ્ચરત્યથ શ્યેનવદાત્મનીડમ્ ।
સુષુપ્તમાસર્પતિ પૂરુષાત્મા
સ સૌમ્યનાથઃ શ્રિયમાદધાતુ ॥ ૧૫॥

સૃષ્ટ્વા સ્વપ્ને વિવિધવિષયાન્
સૂક્ષ્મનાડીગતસ્સન્
યદ્યુત્ પશ્યામ્યહમુસકલં
તત્તદાત્મૈવ સાક્ષાત્ ।
વિદ્વન્ મૂર્તિ ર્ય ઇતિ મનુતે
ગાઢસંસ્કારતન્ત્રઃ
સૌમ્યાધીશઃ(૨)શ્રિતસુરતરુઃ
શ્રેયસેનસ્સ ભૂયાત્ ॥ ૧૬॥

કાન્તાશ્લિષ્ટઃ કિમપિ કમનો
વેત્તિ નાન્તર્ન બાહ્યં
યદ્વત્ સ્વાત્મન્યભયતૃષિ યઃ
પ્રાપ્તનિર્ભેદભાવઃ ।
આનન્દાત્મા સ્વપિતિ ચ તથા
નીરુજઃ પૂરુષાત્મા(૩)

સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રેયસે નસ્સ ભૂયાત્ ॥ ૧૭॥
Footnotes ૧ મહામત્સ્યાદિદૃષ્ટાન્તાઃ ચતુર્થાધ્યાયે તૃતીય બ્રાહ્મણે દ્રષ્ટવ્યાઃ ૨ સૌમ્યસ્ય સૌમ્યકાશ્યા અધીશઃ ૩ પુરુષો જીવઃ તદ્રૂપસ્સન્ ।

પશ્યન્નેવ સ્વયમચલચિ-
દૃશ્યજાતં ન પશ્ય-
ત્યન્યત્(૧)સુપ્તે કરણરહિતઃ
પ્રાજ્ઞભાવં પ્રપન્નઃ ।
દ્રષ્ટુર્દૃષ્ટેર્ભવતિ વિલયો
નાવિનાશિત્વતો યઃ
સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રેયસે નસ્સ ભૂયાત્ ॥ ૧૮॥

સ્વસ્માદન્યત્ સ્ફુરતિ  તમલા
પ્રત્યુપસ્થાપિતં સત્
તત્ર દ્વૈતે ચરતિ પુરુધા
ધીમયો યઃ પરાત્મા ।
દૃષ્ટિવ્રાતિ પ્રભૃતિ (૨)કૃતિભિ-
ર્જાગ્રત સ્વાપ્નભૂમ્યોઃ
સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રેયસે નસ્સ ભૂયાત્ ॥ ૧૯॥

ભારાક્રાન્તં શકટમિવ યો
લિઙ્ગમાસ્થાય વિદ્યા-
કર્માશ્લિષ્ટં વપુરભિનવં
પૂર્વદેહાત્ પ્રયાતિ ।
Footnotes ૧ સ્વસ્માદન્યદૃશ્યજાતં ૨ કૃતિભિરિન્દ્રિય વ્યાપારૈઃ

જાગ્રત્ સ્વપ્નક્રમવદમૃતં(૧)
ચાત્તિ જીવત્વભૃચ્છ્રી-
સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રયસે નસ્સ ભૂયાત્ ॥ ૨૦॥

યોઽયં મૂર્દ્ધ્ના નયનસુષિણા

વાન્ચરન્ધ્રેણ દેહા-
ન્નિષ્ક્રમ્યાન્ચત્ સપદિ વપુર-
(૨)બ્જન્તુવજ્જીવમૂર્ત્તિઃ ।
ધાર્મં ધર્માથ ચ દુરિતા-
દ્દૌરિતગ્ચાદદીત
સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રેયસે નસ્સ ભૂયાત્ ॥ ૨૧॥

ભોક્તું ભોગાન્ ભ્રમતિ વિષયા-
સક્તિતોઽત્રાપ્યમુત્ર
બ્રહ્મજ્ઞાનાદથ ચ જનુષે
નાસ્તતૃષ્ણઃ સ્વધિષ્ણ્યમ્(૩) ।
પ્રાપ્તઃ પ્રાણોત્ક્રમણવિરહા-
(૪)દ્યાતિ યો જીવમૂર્ત્તિઃ
સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રેયસે નસ્સ ભૂયાત્ ॥ ૨૨॥
Footnotes ૧ કર્મફલં ૨ અબ્જન્તુસ્તૃણજલૂકા ૩ સ્વરૂપભૂતં ૪ જનુષે ન યાતીતિ સમ્બન્ધઃ

જિજ્ઞાસન્તે(૧)યદિહ વિવિધૈઃ
કર્મભિર્નિર્નિમિત્તૈઃ
પુણ્યાપુણ્યે તરતિ સુતરાં
યદ્વિદન્ બ્રહ્મસાક્ષાત્ ।
શેતે યદ્વિદ્વપુરુદનિ-
ર્મોકવત્ પ્રાસ્તમારાત્
સૌમ્યાધીશઃ શ્રિતસુરતરુઃ
શ્રેયસે નસ્સ ભૂયાત્ ॥ ૨૩॥

શાન્તિર્દાન્તિસ્તિતિક્ષા હ્યુપરતિરથ ય-
શ્ચિત્તમૈશ્વલ્યમેતૈ-
ર્યોયત્ પ્રત્યક્ પ્રપશ્યત્યહમિદમિતિ સ
બ્રાહ્મણો બ્રહ્મતુલ્યઃ ।
મુખ્યં બ્રાહ્મણ્યમેતન્ન વિકૃતસુકૃતૈઃ(૨)
ક્ષીયતે વર્દ્ધતે વા
વન્દે તં હૈમભૂમીધરાશેખરલસત્

સૌમ્યકાશીપુરીશમ્ ॥ ૨૪॥

પૂર્ણં પૂર્ણપ્રતિષ્ઠાનિરુપચરિત સ-
દ્વસ્તુ યદ્બ્રહ્મ સાક્ષા-
દ્બદ્ધ્યસ્તૈર્નામરૂપૈરુપહિતપદવી-
માપ્નવદ્ભૂરિ ભેદૈઃ ।
Footnotes ૧ મનુજા ઇતિ શેષઃ ૨ અશુભશુભકર્મભિઃ ૩ પૂર્ણસ્ય કાર્યાત્મકસ્ય બ્રહ્મણઃ પ્રતિષ્ઠા અધિષ્ટાનમ્ ।

કર્મોપાસ્તિપ્રકારૈઃ કમિતૃભિરિતરૈ(૧)-
શ્ચૈતદારાધ્યતેઽદ્ધા
વન્દે તં હૈમભૂમીધરશિખરલસત્
સૌમ્યકાશીપુરીશમ્ ॥ ૨૫॥
Footnotes ૧ ફલકામનાવદ્ભિઃ ફલાભિસન્ધિવર્જિતૈશ્ચ ।

## પઞ્ચદશઃ સ્તબકઃ

અસ્મિન્ સ્તબકે શ્વેતાશ્વતરો બ્રહ્મબિન્દુ ષોડશે કૈવલ્યં પરમહંસશ્ચ
કાલ એવ જગન્મૂલં સ્વભાવ ઇતિ ચાપરે ।
વદન્તિ યમજાનન્તઃ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧॥

ભૂતાનિ જગતો મૂલં યદૃચ્છેતિ ચ કેચન ।
જાનન્તિ યમજાનન્તઃ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૨॥

ગુણૈર્નિગૂઢો યો દેવઃ કારણાનાઞ્ચ કારણમ્ ।
સ એવ જગતો મૂલં સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૩॥

વિશ્વમાયા વિનાશસ્સ્યાદ્યસ્ય દેવસ્ય દર્શનાત્ ।
અક્ષરસ્ય ક્ષરેશસ્ય(૧)સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૪॥

ક્લેશપાશાપહાનિસ્તુ દેવં જ્ઞાત્વૈવ નાન્યથા ।
બ્રહ્મશબ્દાભિધેયં યં સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૫॥

યોનિનિષ્ઠો યથાવહ્નિસ્તદ્વદાત્માપિ દેહગઃ ।
યોઽદૃશ્યો દૃશ્યતેઽભ્યાસાત્ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૬॥

ક્ષીરે સર્પિર્યથા તદ્વદાત્મા યસ્સર્વગોઽદ્વયઃ ।
ગૃહ્યતે સત્યતપસા સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૭॥

નન્દશે મૈત્રેયી તેજોબિન્દુશ્ચ સમ્યક્ સઙ્ગૃહીતાઃ
Footnotes ૧ ક્ષરં પ્રધાનમ્ ।

સમેદેશે વિશુદ્ધે ચ ગુહાદૌ વાતવર્જિતે ।
સ્થિત્વૈવ યમનુધ્યાયેત્ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૮॥

યસ્યાભિવ્યક્તિતઃ પૂર્વમર્કધૂમાદિ દર્શનમ્ ।
સમ્ભવેદ્યોગિનાં યોગે સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૯॥

કૃતાર્થી ભ્રાજતે યોગી તેજોમયકલેવરઃ ।
પ્રત્યગ્ચં વીક્ષ્ય યં સાક્ષાત્ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧૦॥

વિશ્વબાહુર્વિશ્વમૂર્તિર્વિશ્વેશો વિશ્વભાવનઃ ।
વિશ્વાધારશ્ચયો રુદ્રઃ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧૧॥

જ્યાયોઽણીયો વા ન કિઞ્ચિદ્યસ્માત્ સ્તબ્ધશ્ચકાસ્તિ ।
વૃક્ષવન્મોક્ષદો મોક્ષઃ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧૨॥

યોષા પુમાન્ કુમારશ્ચ કુમારી ચાસ્તિ યો વિરાટ્ ।
દણ્ડગ્રાહી ચ જરઠઃ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧૩॥

અજયા(૧)મોહિતો ભુઙ્ક્તે જનસ્તાં ન જિહાસતિ ।
ગુણમય્યા તુ યચ્છક્ત્યા સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧૪॥

માયયા સૃજતે વિશ્વં માયી યસ્સઙ્ગવર્જિતઃ ।
અન્યસ્તુ(૨)સજ્જતે તસ્મિન્ સ શમ્ભુઃ પ્રીયતાં પ્રભુઃ ॥ ૧૫॥

ઉપાદાનં માયા શબલિતપરબ્રહ્મજગતઃ
પ્રધાનં વાણુર્વા ક્ષણિકચિદસદ્વા ન ભવતિ ।
નિચાય્યૈતદ્યોનિં(૩)યદિહ વિબુધાનિર્વૃતિમિતા-
સ્સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૧૬॥
Footnotes ૧ માયયા ૨ જીવઃ ૩ નિચાય્ય સાક્ષાત્ કૃત્ય ।

તમો વા રાત્રિર્વા દિવસગણના વા દ્યુતિરિયં(૧)
નયત્રસ્વસ્મિન્ યદ્વિલસતિ શિવં શાન્તમતુલમ્ ।
ન શૂન્યં નાશૂન્યં સ જનુરજનુશ્ચાપિ યદહો
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૧૭॥

અધશ્ચોર્દ્ધ્વં પશ્ચાત્ પુરત ઇતિ સર્વાસુ નિતરાં

કકુપ્સુ(૨)ભ્રાજિષ્ણુપ્રસૃતમહમિત્યેતદૃષયઃ ।
નિગૂઢં યત્ પૂર્વેઽવિદુરપિ વિદન્ત્યદ્ય સુધિયઃ
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૧૮॥

પરાત્મા પાચ્યાનાં પરિપચનકૃત્ પ્રચ્યુતિમૃતી
વિભીતો યસ્માદ્યઃ સ્વયમસુભૃતાં(૩)કર્મફલદઃ ।
વિધત્તે કર્માત્તિ ધ્રુવમથફલં તસ્ય વિવિધં
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૧૯॥

ન યોષિત્ ષણ્ડો વા ન ખલુ પુરુષો વાપિ પુરુષઃ(૪)
પરાત્મા યોઽલિઙ્ગોપ્યતનુ તનુરૂપૈઃ(૫)પ્રકૃતિજૈઃ ।
સલિઙ્ગઃ ક્રીડત્યાન્તનુરિદમવષ્ટભ્ય ભુવનં
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૨૦॥

મહિમ્નાયસ્યેદં ભ્રમતિ ભવચક્રં ભવપતે-
ર્ભ્રમેનાં કાલેન પ્રકૃતિવશતો વા ન ચ ભવેત્(૭) ।
ભ્રમેનૈષ્કારણ્યં શિવશિવતવૈષોઽપિ(૮)મહિમા
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૨૧॥

Footnotes ૧ સૂર્યપ્રકાશઃ ૨ દિક્ષુ ૩ પ્રાણિનાં ૪ પરિપૂર્ણઃ ૫ સ્થૂલસૂક્ષ્મરૂપૈઃ પ્રકૃતિઃ સ્વભાવઃ ૭ ભ્રમેનૈષ્કારણ્યઞ્ચ ન ભવેદિતિ યોજના ૮ જગત્ રણવિષયકો જગન્મોહઃ

ન કાર્યં યસ્યેષન્ન ચ કરણમપ્યસ્ય સદૃશઃ
કનીયાન્ જ્યાયાન્ વા ન ચ ગુણમયી યસ્ય વિપુર
સ્વતઃ સિદ્ધાશક્તિર્વિલસતિ વિબોધાદિ(૧)વપુષા
સદાતદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૨૨॥

પ્રધાનક્ષેત્રજ્ઞ પ્રભુરભવહેતુર્ન(૨)ચ પતિ-
ર્યદન્યઃ કશ્ચિદ્યો જનયતિ વિધિં(૩)વિશ્વજનકમ્ ।
યદૈશ્વર્યાત્ સ્ફારં સ્ફુરતિ હૃદયે ચાસ્ય નિગમઃ
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૨૩॥

અબુદ્ધ્વા બ્રહ્મૈતદ્યદિ(૪)યદમૃતં(૫)યાતિ મનુજ-
સ્તદા કુર્યાત્ કૃત્તેરિવ ચ વિયતો વેષ્ટનમપિ ।
મુમુક્ષુર્યં વિદ્યાદ્વિષયવિધુરેણૈવ મનસા
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૨૪॥

નિરુદ્ધે ચિત્તે તુ સ્ફુરતિ પરવિદ્યા સ્ફુટમિયં

મહામોહધ્વાન્તં દલયતિ પલાલોપમમથ ।
નિરર્થાન્ ગ્રન્થૌઘાન્ ત્યજતિ યદભિજ્ઞાપ્તિનિરતઃ
સદા તદ્દેવાઙ્ઘ્રિસ્મરણમધુમત્તં ભવ મનઃ ॥ ૨૫॥
Footnotes ૧ જ્ઞાનેચ્છા ક્રિયા સ્વરૂપેણ ૨ મોક્ષહેતુઃ ૩ હિરણ્યગર્ભં બ્રહ્મેતિ યોજનીયં ૫ મોક્ષમ્ ।

## ષોડશઃ સ્તબકઃ

યમિહ પશ્યતિ ચાસ્તિકતામતિ-
શ્ચરણભક્તિરચઞ્ચલધરિપિ(૧) ।
ઇતિ ગુણત્રયનેત્રયુતઃ પુમાન્
સ હૃદિ ખેલતુ સૌમ્યપ્રતિસ્સદા ॥ ૧॥

દ્વિવિધકર્મચયેન(૨)તથાત્મજૈ-
ર્ધનચયૈશ્ચ ન કશ્ચિદવાપ્નુયાત્ ।
યદવવોધજયત્ પદનિર્વૃતિં
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૨॥

સકલસન્યસનં ન તતોઽન્યતો
યદનુદર્શનસાધનમિષ્યતે ।
પરમહંસપદાત્મકમાસ્તિકૈઃ
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૩॥

યતય એવ યદાત્મસમાધિના
(૩)સુખસરસ્વતિમજિતુમીશ્વરાઃ ।
ગૃહપરા ન તથા ગૃહમેધિનઃ
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૪॥
Footnotes ૧ ઈશ્વર પાદાનુરક્તિઃ ૨ શ્રૌતસ્માર્ત કલાપેન ૩ સુખસમુદ્રે ।

વિમલચિત્તતનુર્વિજને(૧)જન-
શ્શિવમવક્રતનુશ્ચ વિચિન્તયેત્ ।
જિતહૃષીકગતિર્યમુતસ્થિવાન્
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૫॥

અસિતકણ્ઠમુમેશમનદ્ભુતં(૨)
પ્રભુમજં ત્રિદૃશં પરમેશ્વરમ્ ।

હૃદિ દધીત તથાયમનન્યધીઃ
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૬॥

યમનુસન્દધદેવમુમાધવં
સુખચિદાત્મકમાત્મપદં મુનિઃ ।
સકલસાક્ષિણમૃચ્છતિ ચિદ્ઘનં
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૭॥

કમલજઃ કમલાપતિરપ્યયં
પશુપતિઃ સુરતારપતી ચ સઃ ।
યમિહ પશ્યતિ યો નિજહૃત્તટે
સ હૃદિ ખેલતુ સૌમ્યમ્પતિસ્સદા ॥ ૮॥

પુરિશયં પુરુષં પરમાદરા-
દ્યમનુવીક્ષ્ય વિલઙ્ઘયતિ(૩)ક્ષણાત્ ।
જનિમૃતી ન વિમુક્તિરિતોઽન્યથા
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૯॥

Footnotes ૧ વિજને સ્થાને તસ્થિવાન્ યં વિચિન્તયેદિતિ યોજના ૩ મુમુક્ષુરિતિ શેષઃ

નિરવશેષમવસ્થિતમાત્મનિ
સ્વહૃદયાન્તરિદં હિ ચરાચરમ્ ।
ઇતિ નિતાન્તમતિઃ પદમેતિ યત્
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૦॥

સુધિષણા પ્રણવારણિ ઘર્ષણા-
જ્જ્વલિત એષ દહેજ્જ્વલનો ભૃશમ્ ।
(૧)યદવબોધતનુર્ભવબન્ધનીં
સહૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૧॥

સ્વયમસઙ્ગચિદુદ્ઘદવિદ્યયા
વિપરિમૂઢ ઇવોઢકલેવરઃ ।
ચલતિ યો લલનાદિષુ જાગ્રતિ
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૨॥

અથ ચ યઃ કરણોપરમેસ્વયં
સૃજતિ વાસનયા સકલં જગત્ ।
અથ નિમજ્જતિ ગાઢતમઃ પ્રહૌ(૨)

સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૩॥

નિરુપમે નિજધામ્નિ નિરઙ્કુશે
સુખઘનેઽસ્તસમસ્તભિદે હિ યઃ ।
સ્વયમિહ સ્વમહિમ્નિ વિરાજતે
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૪॥
Footnotes ૧ યદવબોધસ્વરૂપોજ્વલનઃ ૨ પ્રહિઃ કૂપઃ ૩ સુષુપ્તાવિતિ શેષઃ

સ્કકૃતકર્મનિયન્ત્રિત એવ યઃ
સ્વભવનાદ્ધિવિનિષ્ક્રમતે બહિઃ ।
વ્યવહરત્યથ પૂરુષ ભાવભૃત્
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૫॥

ત્રિષુ પુરેષ્વયમેવ મનારતં
ચરતિ યઃ પુરુધા રચયન્ સ્વયમ્ ।
ભુવનમેતદશેષમવિદ્યયા
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧। ૬॥

ઇદમખણ્ડચિતિ પ્રવિલીયતે
સુખસરસ્વતિ યત્ર પુરત્રયમ્ ।
ઉરગરજ્જુનિભે(૨)ચ નિજાત્મનિ
સ હૃદિ ખેલતુ સૌમ્યમ્પતિસ્સદા ॥ ૧૭॥

અમૃતમાયતનં જગતો બૃહ-
ત્તનુતમઞ્ચ(૩)સદોઞ્ચિતિ વસ્તુ યત્ ।
પુરુષ એષ તદેવ ચિરન્તનં
સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૮॥

શ્રવણદર્શનકૃત્ સ્વયમદ્વયઃ
શ્રવણદૃગ્રહિતોઽપિ મહાદ્ભુતમ્ ।
ચરણકૃઞ્ચરણઞ્ચ વિનૈવ ય-
સ્સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૧૯॥
Footnotes ૧ સ્વરૂપભૂતાત્ સુષુપ્તિસ્થાનાત્ ૨ સર્પ રજ્જુવદાર ૩ તનુતમમત્યન્તમણું

સ્પૃશતિ નો સુકૃતં ન ચ દુષ્કૃતં
યમથ યસ્ય ન ધીવપુરિન્દ્રિયમ્ ।
જનિમૃતી ચ ન ભૂપ્રભૃતીન્યપિ(૧)

સ હૃદિ ખેલતુ સૌમ્યપતિસ્સદા ॥ ૨૦॥

નિરાતઙ્કે યસ્મિન્ નિરુપચરિતબ્રહ્મણિ સદા
મનોલીનં યસ્ય ત્યજતિ સસુતાન્ દારસુહૃદઃ ।
અથૈકં કૌપીનં વિહરતિ ગૃહીત્વા વિગતભીઃ
સ શમ્ભુઃ સ્વારાજ્યે(૨)દિશતુ વસતિં(૩)સૌમ્યનિલયઃ ॥ ૨૧॥

ન શીતં નાપ્યુષ્ણં ન સુખમસુખન્નાપિ નિધનં
ન માનામાનૌ શુક્ ક્ષુદપિ ન પિપાસા ન વિષયાઃ(૪) ।
યદાત્મક્રીડૈકપ્રવણધિષણસ્યાસ્તિ વિદુષઃ
સ શમ્ભુઃ સ્વારાજ્યે દિશતુ વસતિં સૌમ્યનિલયઃ ॥ ૨૨॥

નદમ્ભો દર્પોઽહઙ્કૃતિરથ ન નિન્દાસ્તુતિરપિ
ન કામઃ ક્રોધો વા કુણપમિવ ગર્હ્યં સ્વકવપુઃ ।
ન શૌચં વૈપ્ર્યં યત્ પરપરમહંસસ્ય વિદુષઃ
સ શમ્ભુઃ સ્વારાજ્યે દિશતુ વસતિં સૌમ્યનિલયઃ ॥ ૨૩॥

ન દણ્ડી યઃ કાષ્ઠગ્રહણપટુરજ્ઞાનજટિલઃ
સ દણ્ડી હ્યુદ્દણ્ડાન્ સુદૃઢષડરીન્ યો દમયતિ ।
ધૃતો(૫)યદ્બ્રહ્મણ્યવ્યભિચરિતનિષ્ઠૈકલગુડઃ
સ શમ્ભુઃ સ્વારાજ્યે દિશતુ વસતિં સૌમ્યનિલયઃ ॥ ૨૪॥
Footnotes ૧ ભૂમ્યાદિ પઞ્ચભૂતાનિ ૨ સ્વયમ્પ્રકાશે બ્રહ્મધામ્નિ ૩ નિષ્ઠાં ૪ શબ્દસ્પર્શાદયઃ ૫ યેનેતિ શેષઃ

અનિષ્ઠો(૧)યન્નિષ્ઠઃ સ્થિરમતિરનન્તોદવસિતઃ
હિરણ્યે ચાતૃષ્ણો રુચિરવિષયેષ્વાત્મધનિકઃ ।
વરેણ્યો યો ભિક્ષુસ્સતુ જયતિ નાન્યેઽધનિધયઃ
સ શમ્ભુઃ સ્વારાજ્યે દિશતુ વસતિં સૌમ્યનિલયઃ ॥ ૨૫॥
Footnotes ૧ અનિકેત ઇત્યર્થઃ ૨ અનન્તા વસુધા એવ ઉદવસિતં ગૃહં

## સપ્તદશઃ સ્તબકઃ

શિખરીપ્રપતત્યથોદધિઃ
પરિશુષ્યત્યવનિર્નિમજ્જતિ ।
કિમિહાસ્તિભવેઽભવં ભવં
શરણં યાહિ શિવં શિવાધવમ્ ॥ ૧॥

અરમન્ધતમઃ પ્રહીનરઃ
પ્લવવદ્ઘોરભવે વિઘૂર્ણતિ ।
ગતિરત્ર ભવત્ પદામ્બુજે
રતિરેવોત્તરકાશિકેશ્વર ॥ ૨॥

મૈથુનોત્થમતિમાત્રકશ્ચરં
ચાત્રમૂત્ર કુહરાદ્વિનિર્ગતમ્ ।
ગાત્રમેતદસૃગસ્થિસઞ્ચિતં
તત્ર કિં કુરુ રતિં ત્રિલોચને ॥ ૩॥

સ્પર્શરૂપરસગન્ધનિસ્વને-
પ્વાશયા ભ્રમતિ યઃ પૃથગ્જનઃ(૧) ।
તદ્વિષ્ટતરમાત્મવસ્તુ યત્
સ્વસ્તિદોઽસ્તુ મમ તત્તનુશ્શિવઃ ॥ ૪॥
Footnotes ૧ મૂઢઃ

પ્રાપ્યતે ન તરસા તવ તત્વં
પ્રાપ્યતે તુ તપસાન્તરનેધાઃ(૧) ।
વીતિહોત્ર ઇવ વૃત્તિનિવૃત્યા
શાન્તિમેતિ તપસૈવ હિ ચિત્તમ્ ॥ ૫॥

ચિત્તમેવ હિ ભવો નિજચિત્તં
શોધયેદ્વિવિદિષુશ્શિવતત્વમ્ ।
ભાવયેત્ સરસમઙ્ઘ્રિસરોજં(૨)
કાશિકેશ તવ ચિત્તસરોજે ॥ ૬॥

હેયાદેયાદ્દૂરતો નિર્વિશેષં
નિસ્સામાન્યં ચાસ્તિ યત્તત્વમીડે ।
નિર્વાણં તન્નિર્વપુર્નિર્વિકલ્પં
વિશ્વાધારં વિશ્વનાથાભિધાનમ્ ॥ ૭॥

શુદ્ધં બુદ્ધં નિત્યમુક્તસ્વભાવં
સત્યં સૂક્ષ્મં સંવિદાનન્દસિન્ધુઃ ।
પ્રત્યગ્વસ્તુપ્રીયતાં પ્રેમમૂર્ત્તિઃ
સૌમ્યાકારં સૌમ્યકાશીશ્વરાખ્યમ્ ॥ ૮॥

તવ હે શિવમન્દિરં શરીરં

શિવદસ્ત્વઞ્ચ સદાશિવોઽન્તરાત્મા ।
અહમસ્મિ શિવોઽદ્વયઃ પરાત્મે-
ત્યનુચિન્તાપચિતિસ્તવેશ્વરસ્ય ॥ ૯॥
Footnotes ૧ અનેધાઃ દગ્ધેન્ધનઃ ૨ રસોઽનુરાગો ભક્તિઃ

કૃતધીઃ કૃતસંન્યસનો ન વસે-
ન્નિજનીવૃતિનિર્જિત(૧)વૃત્તિરયમ્ ।
શિવતાવકનિષ્કલરૂપમલં
વિદધીત હૃદિ પ્રવિવિક્તપદે(૨) ॥ ૧૦॥

નવામઠં ભીમવનં ન વાશ્રયેત્
કૃતીકૃતસ્વાત્મવિનિશ્ચયસ્સતામ્ ।
કટાક્ષપાતેન વિપર્યયોજ્ઝિતઃ
કટાક્ષપાત્રં તવ સૌમ્યરાટ્ પ્રભો ॥ ૧૧॥

શિવવિશયવતસ્તવાદ્વિતીયે
હ્યનુપહિતાત્મનિશુદ્ધબુદ્ધમુક્તે ।
સુખમનતિશયં કદાપિ મોક્ષ-
પ્રભવમહો ન ભવેત્ પ્રમૂઢબુદ્ધેઃ ॥ ૧૨॥

કર્મત્યાગઃ પ્રેષજપો વા ન યતિત્વં
ભિક્ષાશિત્વઞ્ચાપિ યતિત્વં ન કથઞ્ચિત્ ।
શશ્વન્નિષ્ઠા સંયમનોત્થૈવ યતિત્વં
વિશ્વેશત્વદ્ધામ્નિ વિભો ભૂમ્નિ મહિમ્નિ ॥ ૧૩॥

અવિદ્યયા શિવ તવ મોહિતા જના
વિચક્ષણા અપિ નિગમેષુ નૈગમમ્ ।
પરાઙ્મુખાઃ ખલુ ન વિદન્તિ પૂરુષં
સ્વચાતુરીમુદરભરાય(૩)બિભ્રતિ ॥ ૧૪॥
Footnotes ૧ નિર્વાસનઃ ૨ પદં સ્થાનં ૩ ઉદરપોષણાય

મૃદુપલમણિકાષ્ઠેષ્વીશવુદ્ધિં વિતન્વન્
ભયકરભવયન્ત્રે ભ્રામ્યતિ ભ્રાન્તચિત્તઃ ।
ભવભવદભવન્તં(૧)વીક્ષ્ય મોક્ષાય સાક્ષાત્
પ્રભવતિ(૨)રવિતુલ્યં હન્ત ભાન્તં હૃદન્તે ॥ ૧૫॥

ધવલગિરિજાબન્ધો

સિન્ધોદુરન્ત કૃપામ્બુ ન-
સ્ત્વમણુ ન પરિચ્છિન્નઃ
છિન્નપિ કાલદિગાદિભિઃ ।
(૩)બહિરપિ ભવાનન્તઃ
પૂર્ણો યથામ્ભસિકુમ્ભકા(૪)
બહિરપિ સદાહ્યન્તઃ
શૂન્યો યથાંવરકુમ્ભિકા ॥ ૧૬॥

ન દર્શનમદર્શનં
ન હગદૃક્ ચ દૃશ્યોદ્ગમો-
પ્યદૃશ્યમપિ યન્ત્ર હિ
સ્વપનજાગ્રદસ્તં ગમઃ ।
(૫)નિરસ્તકલનઞ્ચ યત્
પદમહોદૃષત્ સન્નિભં
ત્વિયં હિ સહજસ્થિતિઃ
શિવં તવોત્તમારાધનમ્ ॥ ૧। ૭॥

Footnotes ૧ ભવન્દ્યતિ ખણ્ડયતીતિ ભવદઃ તસ્ય સમ્બુદ્ધિઃ ૨ મર્ત્ય ઇતિ ૩ ભવાનન્તર્બહિરપિ પૂર્ણ ઇત્યન્વયઃ ૪ ઘટઃ ૫ નિસ્સઙ્કુલ્પં

શિવોઽસ્મિ વિમલોસ્મ્યહં
વિશકલોસ્મિ વુદ્ધોઽસ્મ્યહં
સદસ્મિ સકલોઽસ્મ્યહં
સુખચિદસ્મિ શુદ્ધોઽસ્મ્યહમ્ ।
ઇતિ સ્ફુટમનુક્ષણં
ચ યદિ વૃત્તિરાત્મોન્મુખી
ત્વિયં હિ સહજસ્થિતિઃ
શિવ તવોત્તમારાધનમ્ ॥ ૧૭॥

અકાર્યકરણોઽસ્મ્યહં
હ્યપગુણોઽસ્મિ પૂર્ણોઽસ્મ્યહં
અજન્મનિધનોસ્મ્યહં
નિરુપમોઽસ્મિ નિત્યોઽસ્મ્યહમ્ ।
ઇતિ ત્રિપથગાંવુવ-
દ્યદિ વહેત્ સજાતીયધી-

રિયં હિ સહજસ્થિતિઃ
શિવ તવોત્તમારાધનમ્ ॥ ૧૯॥

બ્રહ્માસ્મીતિ નિજાન્તરાત્મધિષણા(૧)
નૈષ્કમ્પ્યસત્કુમ્ભકાત્
સમ્યગ્બ્રહ્મમયં સમસ્તમિદમિ-
ત્યુદ્દામદૃષ્ટ્યા તથા ।
સૌમ્યાધીશવિભો ભવત્પદમુદ-
સ્તાધ્યસ્તભેદં બુધાઃ
Footnotes ૧ આત્મવૃત્તિનૈશ્ચલ્યરૂપાત્ કુમ્ભકાત્ ।

સમ્પશ્યન્તિ સદા સુરોધકલયા ॥
નાસાગ્રદૃષ્ટ્યા ચ કિમ્ ॥ ૨૦॥

ભાવવૃત્તિમથશૂન્ય વૃત્તિમતિ-
ભક્તિયોગબલપુષ્કલા
સન્નિરસ્ય પરિપૂર્ણવૃત્તિમથ
પાલયેદ્બુધમતલ્લિકા (૨) ।
બ્રહ્મવૃત્તિમિહ તાવકીં પરમ
પાવનીં ન પરિશીલયે-
દ્યસ્સ પુરુષ પશુર્વિપશ્ચિદપિ
નોત્તરેદ્ભવસરિત્ પતિમ્ ॥ ૨૧॥

ત્વન્મયશ્શિવવિરાટ્ ચ સૂત્રમથ
વિષ્ણુજિષ્ણુમુખદેવતાઃ
ત્વન્મયંશિવ ખવાયુવાયુસઙ્ખ-
વારિભૂપ્રભૃતિ વૈકૃતમ્(૩) ।
ત્વન્મયં શિવ યદસ્તિભૂતમથ
ભાવિ સર્વમપિ સૌમ્યરાટ્
ત્વન્મયં યદિ સમસ્તવસ્ત્વથ ચ
ચિન્મયં તદથમન્મયમ્ ॥ ૨૨॥

બ્રહ્મૈવાહં ન જીવો જનિમૃતિરહિતઃ
સચ્ચિદાનન્દસાન્દ્રઃ
Footnotes ૧ પ્રશસ્તો વુધઃ ૨ વૈકૃતં પ્રકૃતિવિકારાઃ ૩ અસુરોધઃ પ્રાણાં શત્રુમિત્રં કલત્રં ખગમૃગભુજગાઃ

સર્વમાત્મૈવ સાક્ષાત્ ।
બુદ્ધિર્બુદ્ધીન્દ્રિયાદિ ક્વચિદપિ ન મયિ
શ્લિષ્ટમશ્લિષ્ટગાત્રો
નિશ્ચિત્યૈવં વિપશ્ચિચ્છિવ તવ વિહર-
ત્યાત્મભૂતો મહાત્મા ॥ ૨૩॥

દેશઃ કાલોનિમિત્તં કથમપિ ન જગ-
જ્જન્મભઙ્ગાદિકાર્યે -
ષ્વેવં સૃષ્ટેરભાવે ક્વ ભવતિ ભવ ભો-
ભોક્તૃભોજ્યભોગપ્રસઙ્ગઃ
બન્ધો મોક્ષન્ધ કસ્યાસ્ત્યખિલકૃદખિલં(૧)
ચેન્દ્રજાલોદ્ભવં ત્વ-
(૨)ન્માયાકૈવલ્યમૂલં શ્રુતિરપિજગદુ-
જ્જૃમ્ભણે બમ્ભણીતિ(૩) ॥ ૨૪॥

કર્તા ભોક્તા ચ ભોગસ્સુખમસુખમથ
સ્વર્ગતિર્દુર્ગતિશ્ચ
પુણ્યાપુણ્યશ્ચ સર્વં વિલસિતમસતો
ભાતિ (૪)તૃપ્યેન્મૃગામ્ભઃ ।
પીત્વા પીત્વા પિપાસુર્યદિ જગદુદિતં
સમ્ભવેત્ સત્યમેતત્
સૌમ્યાધીશત્રિસત્યં(૫)તવ વપુરમલં
ત્વેકમેતતોઽસ્મિ ॥ ૨૫॥

Footnotes ૧ અખિલં કરોતીતિ અખિલકૃત્ હે સર્વશક્ત ઇત્યર્થઃ ૨ માયાકૈવલ્યં માયામાત્રં ૩ તાત્પર્યેણ નિર્વદતીત્યર્થઃ ૪ પિપાસુર્મૃગામ્ભોગતૃષ્ણાજલં પીત્વા પીત્વા તૃપ્યેદ્યદીતિ સમ્બન્ધઃ ૫ ત્રિષુ કાલેષ્વપિ સત્યમ્ ।

## અષ્ટાદશઃ સ્તબકઃ

યોદેવસ્સત્ સ્વરૂપેણ સ્વસ્મિન્નેવ વિરાજતે ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧॥

યો દેવઃ સૂત્રરૂપેણ જગત્ સૂત્રયતિ પ્રભુઃ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૨॥

યો દેવો વિધિરૂપેણ જગત્ સૃજતિ રાજસઃ ।

નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૩॥

યો દેવો વિષ્ણુરૂપેણ જગત્ પુષ્ણાતિ શુક્લવાન્(૧) ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૪॥

યો દેવો રુદ્રરૂપેણ જગદશ્નાતિ તામસી(૨) ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૫॥

યો દેવસ્સૂર્યરૂપેણ જગદ્ભાસયતે સદા ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૬॥

યો દેવસ્સોમરૂપેણ પુષ્ણાત્યોષધિવીરુધઃ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૭॥

યો દેવો વૃષરૂપેણ વર્ષત્યંવુદવાહનઃ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૮॥
Footnotes ૧ સત્વગુણવાન્ તદુપાધિક ઇતિ યાવત્ ૨ તામસો ગુણઃ અસ્યાસ્તીતિ નામસી ।

યો દેવો નૃપરૂપેણ નૃધર્માન્ પાતિ ધર્મવિત્ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૯॥

યો દેવો બ્રહ્મરૂપેણ બ્રહ્મવેદિતુમિચ્છતિ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૦॥

યો દેવો ધેનુરૂપેણ દુગ્ધં દુગ્ધે જગત્ પ્રસૂઃ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૧॥

યો દેવો વ્યાઘ્રરૂપેણ ગર્જત્યૂર્જીવનાન્તરે(૧) ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૨॥

યો દેવઃ ખગરૂપેણ દ્રુતમુડ્ડયને દિવિ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૩॥

યો દેવો વૃક્ષરૂપેણ સ્તબ્ધશ્છાયાં પ્રયચ્છતિ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૪॥

યો દેવસ્તૃણરૂપેણ હરિદ્વર્ણશ્ચકાસ્તિ હિ ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૫॥

યો દેવસ્સર્વરૂપેણ સર્વો ભવતિ સર્વદા ।
નમસ્તસ્મૈ નમસ્તસ્મૈ નમસ્તસ્મૈ નમો નમઃ ॥ ૧૬॥

પ્રસીદ ભગવન્ સૌમ્ય કાશિકેશ કૃપાંવુધે ।
પ્રસીદાવિદ્યકધ્વાન્તધ્વંસહંસનિભપ્રભો(૩) ॥ ૧૭॥
Footnotes ૧ ઊર્જા વિક્રમઃ ૨ હંસસ્સૂર્યઃ

યદિ પ્રસન્નો ભવદઙ્ઘ્રિ સેવા -
    રતિં પ્રયચ્છાન્યદહં ન યાચે ।
નિરસ્તભેદભ્રમમૃત્યુપાશાં
    પરાં પરાનન્દકરીં પરાત્મન્ ॥ ૧૮॥

સમ્પૂરિતમિદં સ્તોત્રં સર્વસિદ્ધિકરં નૃણામ્ ।
શ્રુત્યન્તસુમનોમાદ્ધ્વીહૃદ્યમત્યન્તમુત્તમમ્ ॥ ૧૯॥

જયત્યુત્તરકાશીતિ સૌમ્યકાશીતિ ચ શ્રુતમ્ ।
ક્ષેત્રં ગોત્ર કુલોત્તંસ (૧)હિમવન્મદ્ધ્યસંસ્થિતમ્ ॥ ૨૦॥

પઞ્ચક્રોશવિશઙ્કટં(૨)વરુણયા(૩)
    ચાસ્યા ચ સંવેષ્ટિતં
ભૂભૃદ્ભૂષણવારણાવતનિતં
    વાલંવિયદ્ભ્રાજતે ।
ગઙ્ગા યત્ર ચ ગાયતીવમધુરં
    સામોર્મિતઙ્ગસ્વનૈ-
સ્તપ્યન્તે ચ તપો વિતૃષ્ણમતયો
    યત્રોલ્વણં સાધવઃ ॥ ૨૧॥

તત્રાસ્તે વિશ્વનાથઃ શ્રીશક્ત્યાદિસહિતઃ પ્રભુઃ ।
સ્તોત્રરત્નેન યો દેવસ્તુષ્ટુવેઽનેન સૌમ્યરાટ્ ॥ ૨૨॥
Footnotes ૧ માધ્વમિ ધુ ૨ વિશઙ્કટં વિશાલં ૩ વરુણા અસીત્યુભાભ્યાં સરિ દ્ભ્યાં ૪ દુસ્સહમ્ ।

યઃ પઠેત્ પ્રયતો નિત્યં શ્રદ્ધયૈતદનન્યધીઃ ।
સ કામો લભતે કામં નિષ્કામો મુક્તિમાપ્નુયાત્ ॥

કેરલાવનિસુતેન શોભનં
ભૂરિભાગ્યનિધિનેદમીરિતમ્ ।
ભિક્ષુણા હિમમહીધ્રશ‍ૃઙ્ગિકો-
ત્સઙ્ગવાસરસિકેન કેનચિત્ ॥ ૨૪॥

વિશ્વેશ્વરસ્ય કૃપયા ખલુતત્પ્રયુક્તઃ
(૧ )ક્ષુદ્રોપલબ્ધિમકુટોઽહમકાર્ષમેતત્ ।
તસ્યાર્પિતશ્ચ પદયોઃ સ્તવકોપહારઃ(૨)
સ્તોત્રાત્મકસ્સુરભિલોઽસ્તુ સ સુપ્રસન્નઃ ॥ ૨૫॥

ઇતિ શ્રી સૌમ્યકાશીશસ્તોત્રં સમ્પૂર્ણમ્ ।
Footnotes ૧ ઉપલબ્ધિર્બુદ્ધિઃ । અત્યન્તકૃશવુદ્ધિરિતિ યાવત્ ૨ સ્તવાઃ ગુચ્છાઃ તએવ ઉપહારઃ

## ભૂમિકા

યહ અષ્ટાદશસ્તબકાત્મક “શ્રી સૌમ્ય કાશીશસ્તોત્ર “ સર્વોપનિષદ્રૂપ કલ્પતરુ કે પુષ્પોમેંસે સાભિનિવેશ આકર્ષિત કિયા હુઆ “મધુ “હૈ । અનેક પ્રકારકે રાગ ઔર દ્વેષાદિસે ભરપૂર યહ સંસારમેં પરમેશ્વર કી ભક્તિ ઔર જ્ઞાનાખ્ય “મધુ “આસ્વાદનસે પરં ઔર કોઈ વાસ્તવિક પુરુષાર્થ નહીં હૈ ।

યહ સ્તોત્રરાજ ઐસા હૈ કિ, પઢને માત્રસે અવર્ણનીય ભક્તિરસકા હૃદયમેં સઞ્ચાર હો જાતા હૈ, યદ્યપિ આજકલ સ્તોત્ર તો બહુત ઉપલબ્ધ હોતે હૈં, તથાપિ, ઇસમેં તો અનેક પ્રકાર કી અપૂર્વતાએં ભરી હૈ; જિસમેં સે મુખ્ય તીન કા તો મૈં ઉલ્લેખ કરતા હૂમ્ ।

નૈષ્કર્મ્યમપ્યચ્યુતભાવવર્જિતમ્ ।
ન શોભતેજ્ઞાનમલં નિરઞ્જનમ્ ॥
અર્થાત્, કૈસામી નૈષ્કર્મ્યરૂપ, પરિપૂર્ણ નિરઞ્જન, જ્ઞાન હોવે તથાપિ ઉસી જ્ઞાન યદિ પરમેશ્વર ભક્તિ રહિત હોવે; તો વહ અચ્છા નહીં લગતા ; કેવલ “શુષ્ક લગતા હૈ । ઇસી બાતકું ધ્યાનમેં રખકર, યહ સ્તોત્ર મેં અનેક પ્રકારકે ઉત્તમ છન્દોમેં, ઈશાદિ બૃહદારણ્યકાન્ત દશ, ઔર શ્વેતાશ્વતર આદિ છ, ઐસા મિલકર ષોડશ ઉપનિષત્ કે અર્થોંકુા અતિ સરલતા ઔર ભક્તિરસપૂર્વક શ્રી ઉત્તરકાશી વિશ્વનાથમેં સમન્વય કિયા હૈ । અતએવ સભક્તિક જ્ઞાનકા પ્રતિપાદન, યહ પ્રથમ અપૂર્વતા હૈ ।

શ્રી ઉત્તરકાશીક્ષેત્ર બડા પુણ્યસ્થાન હૈ । અહો ! જિસને પૃથ્વીભર કા પર્વતરાજ હિમગિરિમધ્યસ્થ ઇસ ક્ષેત્રકા દર્શન શ્રવણાદિક કિયા નહીં ઉસકુ ભાગ્યહીન માનનેમેં કોઈ દોષ નહીમ્ ।

જહાકું વૃક્ષ અપનેકો સ્થાવર યોનિ મિલને પરભી સ્વજન્મ સાફલ્ય માનતે હુવે, સંસાર સન્તપ્ત પુરુષોં કી તરફ દેખકર; અપને ખીલે દુવે પુષ્પોંસે માનોં હાંસી કરતે હુવે માલુમ પડતે હૈમ્ ।

જહાં પતિત પાવની ભાગીરથી અપની ચંઞ્ચલ લહરિયોન્દ્વારા નિરન્તર તાણ્ડવ કરતી હુઇ, ક્લેશાદિ પરિપીડિત મનુષ્યોંકુા દર્શન માત્રસેહી સર્વ પ્રકારકા દુઃખ નિવૃત્ત કર દેતી હૈ । ઔર શ્રી રચયિતા ઇસ સ્તોત્ર કે અન્તિમ સ્તબકમેં લિખતે હૈં કિ,

પઞ્ચક્રોશવિશઙ્કટં વરુણયા ચાસ્યાચ સંવેષ્ટિતમ્ ।

ભૂભૃદ્ભૂષણ વારણાવત નિતમ્બાલમ્બિયદ્ ભ્રાજતે ॥

ગઙ્ગા યત્ર ચ ગાયતીવ મધુરં સામોર્મિતુઙ્ગસ્વનૈ -।
સ્વપ્યન્તે ચ તપો વિતૃષ્ણમતયો યત્રોલ્બણં સાધવઃ ॥ ૧॥
તત્રાસ્તે વિશ્વનાથઃ શ્રીશક્ત્યાદિ સહિતઃ પ્રભુઃ ॥
સ્તબક ૧૮। શ્લો। ૨૧/૨૨ ।
અર્થાત્ પાઞ્ચ કોસ તો જિસકા વિસ્તાર હૈં; વરુણા ઔર અસી નદિયાં જિસકુ સંવેષ્ટન કર રહી હૈ । પર્વતભૂષણ વારણાવત, (હિમગિરિકા શાખાપર્વત)કે મધ્ય ભાગમેં જો સ્થિત હૈ; જહાં ગઙ્ગા ભગવતી અપના વેગવત્તર પ્રવાહકી ઉર્મિયોં કે ઉચ્ચ મધુર સ્વરોંસે માનોં સામગાન કરતી હુઇ માલુમ પડતી હૈ; ઔર જહાં તૃષ્ણારહિત પરમહંસ સાધુલોગ અતિ કઠિન તપશ્ચર્યા કર રહે હૈમ્ । ઉસ પુણ્યક્ષેત્ર મેં શ્રીવિશ્વનાથજી શક્તિસહિત વિરાજતે હૈ । ફલતઃ ઐસે શુદ્ધ ક્ષેત્ર કે અધિષ્ઠાતા શ્રીવિશ્વનાથજીકા યહ સ્તોત્ર હોનેસે, પઠન કરનેવાલોકુો અદ્વિતીય ભક્તિજ્ઞાન પ્રાપ્ત કરા દેતા હૈ યહ દ્વિતીય અપૂર્વતા હૈ ।

જૈસે કોઇ ચારિત્ર્યહીન વિદ્વં લોગ, અપની વિદ્વત્તાકો દિખાનેકે લિયે સ્તોત્ર બના દેતે હૈં; ઐસા યહ નહીં; કિન્તુ ઇસકો તો પરમહંસ બ્રહ્મનિષ્ઠ સ્વામીજી શ્રી તપોવનજી મહારાજ, જો પરમપૂજ્ય, પ્રાતઃ સ્મરણીય, તેજોમય મૂર્તિ હૈ; ઉન્હોંને કોઇ ચાતુર્માસ્યકે સમય મેં શ્રી ઉત્તરકાશી મેં, અપને હૃદયાન્તર્ગત શિવભક્તિ ઉદ્રેક સે; પ્રતિદિન નિયમાનુસાર દશ બારહ શ્લોક બનાકે શ્રીવિશ્વનાથજીકુ સુનાના; ઐસે પ્રાયઃ દેઢ માસમેં યહ પવિત્ર સ્તોત્ર પૂર્ણ કરકે ભગવાન્ સદાશિવકો અર્પણ કિયા ।

અત એવ ઐસે પરમપવિત્ર શુદ્ધ ચારિત્રવાન્ ભક્તિજ્ઞાન યુક્ત મહાત્મા કા બનાયા હુઆ સ્તોત્ર કા પાઠ કરનેસેહી અન્તઃકરણ શુદ્ધ હો જાતા હૈ; ઔર ભક્તિભાવ પ્રગટ હોતા હૈ । શુદ્ધ પુરુષ પ્રણીત યહ સ્તોત્રકા પાઠ, સર્વપાપશુદ્ધિકા હેતુ હોનેસે ઇસમેં યહ તૃતીય અપૂર્વતા હૈ ।

મૈંને અચાનક યહ સ્તોત્ર પૂજ્ય સ્વામીજીકી પાસ દેખકે પઢા; મેરેકો વડાહી આનન્દ પ્રાપ્ત હુઆ; ઔર લોકોપકારાર્થ યહ છપવાના અચ્છા હૈ, ઐસી મેરી પ્રાર્થના ઉનકુ ઠીક લગી; અતએવ ઇસકો પ્રકાશ કરનેકા મૈં ભાગ્યવં હુઆ । ઇસમેં કઠિન શબ્દોમ્પર જો ટિપ્પણી હૈ વહ ભી પૂજ્ય મહારાજને બનાઈ હુઇ હૈ । આશા હૈ કિ, ઉપનિષદ્ જાનનેવાલે ઔર સંસ્કૃતજ્ઞ પુરુષોકુો તો ઇસકે પઢને માત્રસેહી ઉપનિષદાભ્યાસ હો જાયગા અતએવ યહ અમૃતસમાન હૈ । ઔર જિનકો અર્થોપલબ્ધિ નહીં હૈ, ઉનકો ભી પાઠસે પરમ ચિત્ત શુદ્ધિ હોગી । યદિ ઇશ્વરેચ્છા તો મૈં યથા સમય ઇસકી હિન્દી ટીકા ભી બનાકે પ્રકાશ કરનેકા વિચાર કરતા હૂમ્ । ઇસકો ક્રમશઃ દેખનેસે અન્તર્ગત રસિકતા ભાન હોતી જાયગી; ઔર આપ સહસા કહોગે કિ ઐસા સ્તોત્ર તો અભૂતપૂર્વ હૈ ।

ઇસ ગ્રન્થકો મુદ્રણ કરાને મેં શ્રીમાન માનશઙ્કુર ભાઈ ત્રિવેદીજીને જો સહાય કિયા હૈ, ઔર ઇસકા ખાસ મુદ્રણ-કર્તા શ્રીમાન્ પ્રભાશઙ્કુર પાઠકજી કિ જિન્હોંને મુદ્રણ કાર્ય મેં અશુદ્ધિ ન રહજાવે ઇસ લિએ અતીવ પરિશ્રમ કિયા હૈ; અતએવ ઉન દોનોં સજ્જનોકુા મૈં બડાહી ઉપકૃત હુમ્ ।

ઔર ઇસકે પ્રકાશન કાર્યમેં જિન સજ્જન પુણ્યાત્મા પુરુ બોઙ્કી ઓરસે ન્યૂનાધિક આર્થિક સહાય દીગઈ હૈ ઉન્હોઙ્કા નામ કૃતજ્ઞતાપૂર્વક યહામ્પર પ્રકાશિત કરતા હૂમ્ ।
આપકા કૃપાકાઙ્ક્ષી,
વલ્લભરામ શર્મા
હૃષીકેશ, એપ્રિલ ૮, ૧૯૩૦

# Preface

Man ignorant of his true Divine Nature vainly tries to secure happiness in the perishable objects of this illusory sense universe. He is thus caught up in the samsaric wheel of birth and death. He should always remember that the goal of life is God Realization and not money. The only way for his escape from the miseries of this mundane existence is through attainment of knowledge of Brahman, chiefly through devotion.

This book Sree Saumya Kasisa Stotram is written by H. H. Swami Tapovanji Maharaj, an eminent sanskrit scholar of high erudition, severe tapas and adhyatmic, Spiritual anubhava. It consists of 18 chapters. It contains the quintessence of 16 upanishads, 10 classical and 6 minor viz. Swetaswatara(10), Brahma Bindu, Kaivalya, Paramahamsa, Maitreyee and Tejobindu, expressed in a stotra form in Sanskrit Verse in praise of Lord Vishwanath of Uttara Kasi, Himalayas.

The famous Uttara Kasi is situated right in the centre of Himalayas. Its natural scenery is marvellously picturesque and un precedented. The Spiritual vibrations are Soul-stirring and highly elevating. It is the best place which is specially suitable for contemplative life. Even a rank materialist and confirmed atheist will be forced to lead a life of dispassion and tapas of his own accord. The benign Soul-soothing, devotional influence is highly powerful. Right in the centre lies the magnificent and antique temple of Lord Vishwanath.

It seems that Prakriti has taken immense trouble in the natural decoration of this place to make it very facinating for Spiritual aspirants. The hearts of aspirants are filled(11) with exhuberant joy and without serious efforts they are taken to a high, meditative devotional mood. The Pranava dwani proceeding from the sacred Ganges is highly beneficial to make the mind one-pointed. In winter the peaks all around are clad with snow and the snowy silvery peaks heighten considerably the beauty and grandeur of Uttar kasi. Ishwar's whole

Vibhuti is centred in the natural scenery of the Himalayan heights. Any man who visits this place is struck with a high sense of wonder and admiration. Devotion arises in his heart and he is in tune with Nature and Nature's Lord. He becomes God intoxicated. Having seated himself amidst such gorgeous, elevating atmosphere of Uttar kasi in the temple of Lord Vishwanath and heart being filled with profound devotion, Swami Tapovanji began to compose 10 or 12 slokas of this 'Sree Saumya kasisa stotram' daily and used to recite them before Lord Vishwanath while he was spending his chaturmasya(12) there in 1929. He finished the whole stotra within 41 days.

In this connection, it will not be out of place to mention a few words on devotion. In this kaliyuga, it is extremely difficult to practise Hatha and Rajayogas. The path of devotion and devotion alone is suitable for all. It is easy too. Any man can recite the name of God. Any man can sing his praise and Glory. It is quite safe also. Though Sree Shankara had refuted jiva and Ishwar, he himself .. was a Bhakta. He has made several stotras on various Deities. Though he severely condemned the Bhakti Shastra in his Shariric Bhashya, he was not an opponent of the path of devotion. When devotion is fully ripe jnana comes by itself. The vast majority of mankind have to get knowledge through devotion. People of devotional temperament will find a treasure in this book of Stotras. They will develop strong devotion by repeating daily the stotras. Men of vichar also will find(-13) substantial, ennobling ideas for philosophical ratiocination and reflection. That is the beauty and attractive feature of this book. The abstruse long portions of the Upanishads are rendered very, very clear and expressed in a lucid style and easy language without any technicality at all. The Author's views are in accordance with the doctrine of Shree Shankara.

This book is a masterpiece in style and thought. It is full of inspiring, sublime thoughts. It will doubtless greatly benefit those who are athirst for devotion and knowledge, who care for the deeper things of life and who are earnestly searching for the true inward bliss in the subjective, eternal, pure, Satchitananda Atma.

OM. OM. OM.

Rishikesh, Swami Sivananda ..

30th March 1930.0000

Footnotes are given as in the printed book.

Proofread by Rajesh Thygararajan

*Sarvopanishatsarabhutam Shri Saumyakashisha Stotram*

pdf was typeset on August 1, 2025

Please send corrections to *sanskrit@cheerful.com*